श्रीः
भा॰ टी॰
९

ॐ गणेशाय पार्वतीनंदनाय नमः ॥ ॐ जयंति श्रीपरानंदकृपापांगलवस्पृशः यानित्वमनुवर्त्तंते संपदो विगतापदः
उक्तस्त्रयोदशाध्यायैर्हार्दश्चेवाश्रयस्ततः आश्रयज्ञानावधिनाभ्यामाश्रयः वेश्वरः स्मृतः उक्तोलयावधित्वेन प्राक्
नात्यंतिके लये आश्रयज्ञानवयावोक्तो महापुरुषवर्णिते नवाद्यैश्चतुर्विंशध्यायैः शुकः प्राह परीक्षिते शेषैस्तथाविलार्थ
हस्तः शृण्वोश्चसप्तभिः स्वाश्रयश्रवणोत्कार्यीन विलेबोमनीषिणां इत्येष कालवैषम्यं नृनभिस्तावदुच्यते तत्र
प्रथमे भाविमागधान्वयभूमिपान् कलिप्रभावतः प्राह संकरादिमलीमसान् एवंभूते सोमवंशे श्रीमदुद्दिष्टे
कीर्त्यवर्णितान्यासः एवं वंशोभावी
त्वनालीनिव कुंवात देवं वैवस्वतम

वर्ण्यते श्रीकृष्णभक्तिमुक्तामुक्तैव
ज्वंशे सोमवंशे प्रस्तावेन श्रीकृष्णाय

राजोवाच ॥ स्वधामानुगते कृ
ष्णे भवत्सुखामेनदावल्लमे

सोयदुर्वंशाविभूषणे कस्यव
मुने १ ॥ ॥

तावद्वर्णितानि समप्रपंचमनुवर्णितं
कलौ विजातीयसंकरादिमलमसौ

तानि प्रद्येशानीमाविसोसर्वशः
वैराग्यद्वारा श्रीकृष्णैकभक्तिर्निर्गम

मायानुवर्ण्यते तत्र सोमवंशस्याखोसविस्कालानुवर्तिन यामागधवंशोनुवर्ण्यते नत्र हरसेवं शेउपरिचरो वसुः त
स्य बृहद्रथः तस्य जरासंधः तस्य सहदेवः पुत्रोभूदित्युक्तं तत्र मस्कंथनत्वैव सहदेवान् मार्जारिः ततः श्रुतश्रवा ततोयुतायुः ततो निरमित्रः ततः सुनक्षत्रः ततो बृहत्सेनः ततः कर्मजित् ततः सुतंजयः ततो विप्रः ततः शुचिः ततः क्षेमः ततः सुव्रतः ततो धर्मसूत्रः ततः शमः ततो द्युमत्सेनः ततः सुमतिः ततः सुबलः ततः सुनीथः ततः सत्यजित् ततो विश्वजित् ततो रिपुं
जयो नाविंशतिर्भाविनो राजानो निरूपिताः तदुपरि तन्वंशसंकरादिदोषैः प्रपेवयति योत्वइति रिपुंजयस्वपु
रंजयः स्वामिनं पुरंजयं स्वामिनं पुरंजयं हत्वा स्वपुत्रं प्रद्योतं राज्ञा
नकविष्यति १ ॥

१

यस्य पालको नाम भविष्यति २ प्रद्योतनाः प्रद्योतसंज्ञाः ३ नंदो नाम कश्चित् महापद्मसंख्यायाः।
सेनायाः धनस्य च पतिर्भविष्यति अत एव महापद्म इति प्रथितस्य नंदस्यापरं नाम ८ एकमेवछत्रं

शुक उवाच योऽन्त्यः पुरंजयो नाम भविष्यो बार्हद्रथः तस्यामात्यस्तु शुनको हत्वा स्वामि
नमात्मजं २ प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः २ विशाखयूपस्तत्पुत्रो भविता रा
जकस्ततः नंदिवर्धनस्तत्पुत्रः पंच प्रद्योतना इमे ३ अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृ
पाः ३ शिशुनागस्ततो भाव्यः काकवर्णस्तु तत्सुतः क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमध
र्मजः ४ विधिसारस्तु तत्सत्यो जातशत्रुर्भविष्यति दर्भकस्तत्सुतो भावी दर्भकस्याजयः
स्मृतः ५ नंदिवर्धन आजेयो महानंदिः सुतस्ततः शिशुनागा दशैवैते षष्ट्युत्तरशतत्रय
६ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः महानंदिसुतो राजन् शूद्रागर्भोद्भवो ब
ली ७ महापद्मपतिः कश्चिन्नंदः क्षत्रविनाशकृत् ततो नृपा भविष्यंति शूद्रप्रायास्त्वधा
र्मिकाः ८ स एकच्छत्रां पृथिवीमनुल्लंघितशासनः शासिष्यति महापद्मो द्वितीय इव भा
र्गवः ९ तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः य इमां भोक्ष्यंति महीं राजानः स्म
शतं समाः १० नव नंदान् द्विजः कश्चित्प्रपन्नानुद्धरिष्यति तेषामभावे पृथिवीं मौर्या
भोक्ष्यंति वै कलौ ११ स एव चंद्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति तत्सुतो वारिसारस्तु ततश्चा
शोकवर्धनः १२ सुयशा भविता तस्य संगतः सुयशःसुतः शालिशूकस्ततस्तस्य सोम

यस्यां तां पृथिवीं शासिष्यति पालयिष्यति तदीयां स्यादनेन दृष्टांतः भार्गवः परशुराम इव ९ समाः सं
वत्सरान् १० नव नंदान्नंदवंशजान् चाणक्यनवप्रपन्नान् विष्णुगुप्ताख्यो नाम्ना द्विजः कौटिल्यवात्स्या
यनादि पर्यायः चाणक्य उद्धरिष्यति उन्मूलयिष्यति मौर्याः मौर्यसंज्ञाः ११ कथं भोक्ष्यंति तदाह स एव

क्रमं भविष्यति १२

वेत्ति चंद्रगुप्तं मौर्यं प्रथमं १२

कथं भोक्ष्यंतीत्यत आह स एवेति चंद्रगुप्तं मौर्यं प्रथमं १३ तेषां प्रथमो दशरथः पराशरादिभिरुक्तो
यमनुसंधेयः तेन सह मौर्या दश सप्तत्रिंशच्छतोत्तरं सप्तत्रिंशदुत्तरं शतं समाः १४ बृहद्रथस्य सेनाप
तिः पुष्पमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति १५ स च शुंगानां प्रथमः ततोग्निमित्रादयो नव ए

शतधन्वा ततस्तस्य भविता तद्बृहद्रथः मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं १३ स
मा भोक्ष्यंति पृथिवीं कलौ कुरुकुलोद्वह १४ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः व
सुमित्रो भद्रकश्च पुलिंदो भविता ततः १५ ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति त
तो भागवतस्तस्माद्देवभूतिः कुरूद्वह १६ शुंगा दशैते भोक्ष्यंति भूमिं वर्षशताधिकं ततः।
काण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप १७ शुंगं हत्वा देवभूतिं काण्वोमात्यस्तु कामिनं स्व
यं करिष्यते राज्यं वसुदेवो महामतिः १८ तस्य पुत्रस्तु भूमित्रः तस्य नारायणः सुतः काण्वा
यना इमे भूमिं चत्वारिंशच्च पंच च १९ शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ युगे १९ हत्वा
काण्वं सुशर्माणं तद्भृत्यो वृषलो बली गां भोक्ष्यत्यंध्रजातीयः कंचित्कालमसत्तमः २०

वं शुंगा दश वर्षशताधिकं वर्षशतं १७ कथं काण्वान्यास्यतीत्यत आह परस्त्रीकामिनं देवभूतिनामा
नं शुंगं हत्वा तदमात्यो वसुदेवनामा काण्वो राज्यं करिष्यति १८ काण्वायना नाम वसुदेवः सुशर्मांतमे
वसुदेवादयः काण्वायनाः वर्षाणां त्रीणि शतानि पंचचत्वारिंशद्वर्षाणि च भूमिं भोक्ष्यंति १९ क
ण्वानामंतिमं सुशर्माणं हत्वा बलिहिकनामा तद्भृत्यो गां भोक्ष्यति २०

यत्र येषु बहुसंख्येषु अष्टमस्तनवमः शिवस्वातिर्नामा भविता २४ आवभृत्याः अवभृतिः नाम नगरी तस्या
नाथाः २७ एते आभीरादयो मौनव्यतिरिक्ताः पंचषष्टिर्नृपाः एकोनशताधिकवर्षसहस्रं पृथिवीं भो
क्ष्यंति ततः सर्वोत्तमपदमेकादश मौनाः त्रीणि अब्दशतानि क्षितिं भोक्ष्यंति तैः संस्थितेषु मौनेषु मृते

कृष्णनामाथ तद्भ्राता भविता पृथिवीपतिः श्रीशातकर्णिस्तत्पुत्रः पौर्णमासस्तु तत्सुतः
२१ लंबोदरस्तु तत्पुत्रः तस्माच्चिविलको नृपः मेघस्वातिश्चिविलकादटमानस्तु तत्सुतः
२२ अनिष्टकर्मा हालेयः तलकस्तस्य चात्मजः पुरीषभीरुस्तत्पुत्रः ततो राजा सुनंदनः २३
चकोरो बहवो यत्र शिवस्वातिररिंदम तस्यापि गोमतीपुत्रः पुरीमान्भविता ततः २४ मे
दशिराः शिवस्कंधो यज्ञश्रीस्तत्सुतस्ततः विजयस्तत्सुतो भाव्यः चंद्रविज्ञः सलोमधिः २५
एते त्रिंशन्नृपतयः चत्वार्यब्दशतानि च षट्पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन २६ स
प्ताभीरा आवभृत्या दशगर्दभिनो नृपाः कंका षोडश भूपाला भविष्यंत्यतिलोलुपाः २७
ततोष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः भूयो दश गुरुंडाश्च मौना एकादशैव तु २८
एते भोक्ष्यंति पृथिवीं दश वर्षशतानि च नवाधिकां च नवतिं मौना एकादश क्षितिं २९
भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः किलिकिलायां नृपतयो भूतनंदोथ भृंगिरिः
३० शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः इत्येते वै वर्षशतं भविष्यंत्यधिकानि षट् ३१ ते
षां त्रयोदश सुता भवितारश्च बाह्लिकाः पुष्पमित्रोथ राजन्यो दुर्मित्रोस्य तथैव च ३२

पुरि किलिकिलायां नगर्यां नृपतयो भविष्यंति उत्तरेणान्वयः ३० अधिकानि षड्वर्षाणि ३१ तेषां भू
तनंदादीनां यथा सप्त बाह्लिकाः अभ्यामानः त्रयोदश सुता भविष्यंति अथ पुष्पमित्रो नाम अन्यो राजन्यः

श्रीः
भा॰ टी॰
ह॰ टी॰
३

तथाग्रांधाः कौशलाः वैदूरपतयः विषयाश्च एतेन देशनामभिः प्रख्याताः तुल्यकालाः खंडमंडलेषु
भूपाः तत एव तेभ्यो वाह्लिकेभ्य एव भाव्या भविष्यंति ३३ ततश्च मागधानां तु राजा विश्वस्फटिकनामा भवि
ता स पूर्वोक्तान्पुरंजयस्यवः पुरंजयादि इति प्रसिद्धः स तु वर्णान्ब्राह्मणादीन् पुलिंदयदुमद्रसंज्ञान्म्लेच्छप्रा
यान्करिष्यति पुष्पवान्तिति पाठे अन्यान्पुलिंदादिसंज्ञान्वर्णान्करिष्यतीत्यर्थः ३४ स एव वंशानाग्रबलभूयि
ष्ठाः न वृल स्थाने प्रघ्यवावृत्तिर्वे देवटाहिंस्य प्रवेव एपि प्रचुराः सतीः प्रजाः स्थापयिष्यति पालयिष्यति स च
पद्मावत्यां पुरि अनुगंगं गंगाद्वारमारभ्य प्रयागपर्यंतं गुप्तां बहिंतां पालितां मेदिनीं भोक्ष्यति ३५ नव

एककालइमेभूपाः समाधाः सम कौशलाः वैदूरपतयो भाव्या नैषधास्तत एव हि ३२ मा
गधानां तु भविता विश्वस्फूर्तिः पुरंजयः करिष्यति परो वर्णान्पुलिंदयदुमद्रकान् ३३ प्रजा
श्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः वीर्यवान्क्षत्रमुत्साद्य पद्मावत्यां स वै पुरि ३४ अ
नुगंगमाप्रयागं गुप्तां भोक्ष्यति मेदिनीं ३५ सौराष्ट्रावन्त्याभीरांश्च शूरानर्बुदमालवाः व्रात्या
द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः ३६ सिंधोस्तटं चन्द्रभागां कौन्तीं काश्मीरमण्डलं भोक्ष्या
न्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ३७ तुल्यकाला इमे राजन्म्लेच्छप्रायाश्च भूभृतः एतेऽध
र्मानृतपराः फल्गुदास्तीव्रमन्यवः ३८ स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः उदितास्त
मितप्राया अल्पसत्त्वाल्पकायुषः ३९ असंस्कृताः क्रियाहीना रजसा तमसावृताः प्रजास्ते भ
क्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः ४०

नेनदं च सौराष्ट्रादिदेशवर्तिनो द्विजा व्रात्याः उपनयनरहिता भविष्यंति अब्रह्मवर्चसः वेदाचारशून्याः ३७ इ
मे च म्लेच्छप्राया भूभृतः तुल्यकाला भविष्यंति किंच एते सर्वे अधर्मानृतपराः अधर्मे अनृते च परिनिष्ठिताः
फल्गुदाः अल्पदातारः ३८ असंस्कृता गर्भाधानादिसंस्काररहिताः प्रजा भक्षयिष्यंति धनाद्यपहारादिना

विष्णुपु॰ अं॰ ४
३

किंचतन्नाथाः तेभूपाः तासांप्रजानांनाथाः तेनाथाः येषांतेजनपदाः देशवर्त्तिनोमनुष्याः तच्छीलाचा
रवादिनः तेषामेवशीलमाचारोवादश्चयेषांते ४३ इतिभावार्थदीपिकायांद्वादशेप्रथमः १ द्वितीयेतुकलेर्दै
षवृद्धौकल्कवतारतः अधर्मनिष्ठजनेनेष्टपुनः कृतयुगागमः कलिधर्मानेवप्रपंचयति ततश्चेत्यादिना १
अधर्मन्यायव्यवस्थायांबलमेवहि २ दांपत्येपतिभावेअभिरुचिरेवहेतुः नकुलगोत्रादिभिः व्याव
हारिकेक्रयविक्रयादौस्त्रीत्वेपुंस्त्वेचरतौः प्रेमरतिकौशलमेवहेतुर्नकुलंआचारोवा ३ आश्रमा

इतीतासन्निनप्रायाहर्षशोकादिविह्वलाः ४२ तन्नाथास्तेजनपदास्तच्छीलाचारवादिनः
अन्योन्यतोराजभिश्चक्षयंयास्यन्तिपीडिताः ४३ इतिभागवतेद्वादशेप्रथमः १ शुकः
ततश्चानुदिनंधर्मः सत्यंशौचंक्षमादया कालेनबलिनाराजन्नंक्ष्यत्यायुर्बलंस्मृतिः
१ वित्तमेवकलौनृणांजन्माचारगुणोदयः धर्मन्यायव्यवस्थायांकारणंबलमेवहि २
दांपत्येभिरुचिर्हेतुर्मायैवव्यावहारिके स्त्रीत्वेपुंस्त्वेचहिरतिर्विप्रत्वेसूत्रमेवहि ३ लिंग
मेवाश्रमख्यातावन्योन्यापत्तिकारणं अवृत्त्यान्यायदौर्बल्यंपांडित्येचापलंवचः ४ अनाढ्य
तैवासाधुत्वेसाधुत्वेदंभएवतु स्वीकारएवचोद्वाहेस्नानमेवप्रसाधनं ५ दूरेवार्ययनंतीर्थं
लावण्यंकेशधारणं उदरंभरतास्वार्थः सत्यत्वेधार्ष्ट्यमेवहि ६ दाक्ष्यंकुटुंबभरणं
यशोर्थेधर्मसेवनं एवंप्रजाभिर्दुष्टाभिराकीर्णेक्षितिमंडले ७

णांख्यातौज्ञानेलिंगमेवदंडाजिनादिकंहेतुः नत्वाचारविशेषः अन्योन्यापत्तिकारणंचआश्रमादा
श्रमांतरप्राप्तौचकारणं यदावहृदकहंसादीनांअन्योन्यापत्तौनमस्कारादिव्यवहारेकारणं अवृत्त्या
मुद्धर्पणादिदानासामर्थ्येनन्यायदौर्बल्यंपराजयः चापलंवचः बहुभाषणं ४ असाधुत्वेचोपपत्तौ
धनोअदत्तमेकाकीर्तिः साधुत्वेचसकृत्वेकरोतिसाधुत्वेदंभएवउद्वाहेस्वीकारः नतुस्नानरागादिः स्नाना
मेवप्रसाधनमलंकारः नतुयोगस्नानं ५ दूरेवतेमानंवारितत्रअयनंतत्तुयोगस्नानं जलाशयस्तीर्थंनतु

७

श्रीः
भा॰ द्वा॰

आच्छिन्ना अपहृता दारा द्रविणानि येषां ते: पृथिवीजं ९ क्षीयमाणेष्वित्यादिषड्भिरित्थंकलौगतप्रायेऽवति
पंचमेनान्वयः क्षीयमाणेष्वल्पप्रमाणेषु १२ दस्युप्रायेषु चोरतुल्येषु चौर्यानृतवृथाहिंसाद्याः नानावृ
त्तयो येषां तेषु १३ छागप्रायासु प्रमाणतः क्षीरतश्च अल्पास्वल्पास्तु वृक्षेषु विद्युत्प्रायेषु निर्दृढ
त्वेषु शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु जनेषु खरधर्मिणि उः सहवेष्टिने कलौ गतप्राये समाप
प्राये १६ एतस्मिन्पर्वणि वर्तमाने चराचरगुरोः श्रीमदीश्वरस्यैव धर्मत्राणे हेतुः गुरुत्वे ईश्वरत्वं च योग्यता

ब्रह्मविट्क्षत्रशूद्राणांयोबलीभविता नृपः प्रजाहिलुब्धैराजन्यैर्निर्घृणैर्दस्युधर्मिभि ८
आच्छिन्नदारद्रविणायास्यन्तिगिरिकाननं शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनैः ९
अनावृष्ट्याविनंक्ष्यन्तिदुर्भिक्षकरपीडिताः शीतवातातपप्रावृड्हिमैरन्योन्यतःप्रजाः १०
क्षुत्तृड्भ्यांव्याधिभिश्चैवसंतापेनचचिंतया त्रिंशद्विंशतिवर्षाणिपरमायुःकलौनृणां
११ क्षीयमाणेषुदेहेषुदेहिनांकलिदोषतः वर्णाश्रमवतांधर्मेनष्टेवेदपथेनृणां १२
पाषंडप्रचुरेधर्मेदस्युप्रायेषुराजसु चौर्यानृतवृथाहिंसानानावृत्तिषुवैनृषु १३ शू
द्रप्रायेषुवर्णेषुछागप्रायासुधेनुषु गृहप्रायेष्वाश्रमेषुयौनप्रायेषुबंधुषु १४ अणु
प्रायास्वोषधीषुशमीप्रायेषुस्थास्नुषु विद्युत्प्रायेषुमेघेषुशून्यप्रायेषुसद्मसु १५ इत्थं
कलौगतप्रायेजनेषुखरधर्मिणि धर्मत्राणायसत्वेनभगवानवतरिष्यति १६ चराचर
गुरोर्विष्णोरीश्वरस्याखिलात्मनः धर्मत्राणायसाधूनांजन्मकर्मापनुत्तये १७ शंभलग्रा
ममुख्यस्यब्राह्मणस्यमहात्मनः भवनेविष्णुयशसःकल्किःप्रादुर्भविष्यति १८ अश्वमाशु
गमारुह्यदेवदत्तंजगत्पतिः असिनासाधुदमनमष्टैश्वर्यगुणान्वितः १९ विचरन्नाशुना

पालनेऽखिलस्यविश्वस्यात्मनः कारणस्येति एवंभूतस्य हरेर्जन्म साधूनां धर्मत्राणाय अपोहनमाह कर्मा
पनुत्तये मोक्षाय १७ शंभलग्राममुख्यस्य प्रधानस्य नाम्ना विष्णुयशसः ब्राह्मणस्य भवने गृहे प्रजाभवि
ष्यति नतु जनानंदसमर्थः १८ धर्मत्राणप्रकारमाह अश्वमिति असाधवो दस्यवस्तेयेन तमश्वमारुह्य असिना द

७

तदेवं आशुना शीघ्रगामिना हयेन क्षोण्यां अप्रमो विचरन् अणिमाद्यैश्वर्यगुणाश्च सत्यसंक-
ल्पादयः तैरन्वितः नृपलिंगछदः राजवेशः कोट्यानुद्दिशति शेषः स्पष्टीका २० ततः वधानंतरं कृतयुगप्रवृत्ति-
वन्तमाह अथेति सार्धाभ्यां तेषां पौरजानपदानां मनांसि विशदानि भविष्यन्ति तत्र हेतुः श्रीवासुदेवस्य
कल्केः अंगरागेण चंदनादिना अति पुण्यगंधो अनिलः तं स्पृशन्तीति तथा तेषां २१ स्थविष्ठः स्थूलः २२ कृ-
तयुगप्रवृत्तिमाह यदावतीर्ण इति प्रजानां सूतिः प्रसूतिः २३ तदेवं तत्कालोपलक्षणमाह य-
दाचंद्र इति तिष्यः पुष्यो नाम नक्षत्रं अयमर्थः चंद्रः सूर्यो बृहस्पतिर्नाय यदा पुष्यनक्षत्रे योगः तदा तत्काले

अथ तेषां भविष्यन्ति मनांसि विशदानि वै वासुदेवांगरागाति पुण्यगंधानिलस्पृशां २१
पौरजानपदानां वै हतेष्वखिलदस्युषु तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति २२ वा-
सुदेवे भगवति सत्त्वमूर्तौ हृदि स्थिते २२ यदावतीर्णो भगवान्कल्किर्धर्मपतिर्हरिः कृ-
तं भविष्यति तदा प्रजासूतिश्च सात्त्विकी २३ यदा चंद्रश्च सूर्यश्च तथा तिष्यबृहस्पती ए-
कराशौ समेष्यन्ति तदा भवति तत्कृतं २४ ये तीता वर्तमाना ये भविष्यन्ति च पार्थिवाः ते त
उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः २५ आरभ्य भवतो जन्म यावन्नंदाभिषेचनं एतद्व-
र्षसहस्रं तु शतं पंचदशोत्तरं २६

कृतयुगं भविष्यतीति यद्यप्यत्र सिद्धार्थस्याप्युक्तं कर्कराशौ बृहस्पतौ वर्तमाने हित्वा स्वभावस्थास्तेषां
त्रयाणामपि पुष्ययोगः संभविष्यति तथापि तेषां त्रयाणामपि सह पुष्यप्रवेशोऽत्र विवक्षितः समी-
यानीति वक्तव्यतारतो नातिप्रसंगः २४ एवं तावत्संक्षेपमारभ्य त्रयुक्तान् वैवस्वतमनोर्वंशादयति
गमयति प्रतीतार्थानि उद्देशतः संक्षेपतः २५ कलियुगवासिनरविशेषे वक्तुमाह आरभ्येत्यादिना
वर्षसहस्रं पंचदशोत्तरं शतं चेति पुनः परीक्षित्समकालमागधमार्जारमारभ्य रिपुंजयान्तः विंशतीरा-
जानः सहस्रं संवत्सरा भोक्ष्यन्तीत्युक्तं तत्संक्षेपेण वाहेव भूपाला भाव्याः सहस्रसंवत्सरमिति ततः प

कलेः प्रवृत्तिंवृद्धिंच निरूपयितुंकालज्ञानोपलक्षणमाह सप्तर्षीणांत्विति निश्चयंयमर्थः प्रागग्रशकटा
कारेणताराणामेकं सप्तर्षिमंडलंतत्रकिंविद्यमानेतेषामग्रस्थानेयोमरीचिः ततःपश्चाद्दानेनैकधुराकारे
वसिष्ठः सभार्यः ततःपश्चाद्दीर्घदंडेतेषांमूलस्थानीयोंगिराः ततःपश्चाच्चतरंश्रुतनाराचतक्षिरेशा
नेत्रिः ततोदक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहः ततउत्तरतःक्रतुः एवंस्थितेतेषांमध्ये
यौपूर्वौउदयसमयेदृश्यमानौपुलहक्रतू तत्संख्योनयोस्तुमध्येतयोस्तुपूर्वयोस्तुमध्येयत्समंदक्षिणो
तः समदेशावस्थितेअश्विन्यादिकंयद्दृश्यतेतेनतन्नक्षत्रेणतेनैतन्तथैवयुक्ता नृणामब्दशतंतिष्ठंति

सप्तर्षीणांतुयौपूर्वौदृश्येतेउदितौदिवि तयोस्तुमध्येनक्षत्रंदृश्यतेयत्समंनिशि २७
तेनैतेऋषयोयुक्तास्तिष्ठंत्यब्दशतंनृणां तेत्वदीयेद्विजाःकालेअधुनाचाश्रितामघा २८
विष्णोर्भगवतोभानुः कृष्णाख्योसौदिवंगतः तदाविशत्कलिर्लोकंपापेयद्रमतेजनः
२९ यावत्सपादपद्माभ्यांस्पृशन्नास्तेरमापतिः तावत्कलिर्वैपृथिवींपराक्रांतुंनचाश
कत् ३० यदादेवर्षयःसप्तमघासुविचरंतिहि तदाप्रवृत्तस्तुकलिर्द्वादशाब्दशता
त्मकः ३१ यदामघाभ्योयास्यंतिपूर्वाषाढांमहर्षयः तदानंदात्प्रभृत्येषकलिर्वृद्धिं

तेचद्विजाः त्वदीयेकालेधुनामघास्वाश्रितावर्तंते २८ तेषुमघासुवर्तमानेषुसत्सुयदाविष्णोर्भानुः
भातीतिभानुः शुद्धसत्वात्मकोदेहः दिवंवैकुंठंगतः तदाकलियुगस्यलक्षणं २९ ननुश्रीकृष्णे
पृथिव्यांवर्तमानेपिसंध्यारूपेणकलिःप्रविष्टएवासीत् सत्यंतथापितावत्तस्यपराक्रमोनाभवदित्य
र्थः इत्याहयावदितिपराक्रांतुंअभिभवितुं ३० अतोयथोक्तएवकलिप्रवेशकालइत्याह य
दादेवर्षयइतिद्वादशाब्दशतात्मकइतिदिव्येनमानेनसंध्यांशाभ्यांसहद्वादशाब्दशतात्मा
कः सकलिः संध्यामतिक्रम्यप्रविष्टइत्यर्थः ३१ कलेःप्रवेशकालमुक्त्वातस्यकलेर्वृद्धिकालमा
ह यदेतितदानंदात्प्रभृतिनिरुद्धिगाक्कनंदराज्यंप्रभृतिसवृद्धिंगमिष्यतीत्यर्थः ३२ ॥ ॥

ननु यदा कलेर्लिंगप्रपलक्षं तदैव प्रविष्ट इत्युक्तं ततः पूर्वमेव प्रवेशः ततः परं च द्विदिनमयं किं प्रमा
णेनेत्याह यस्मिन्निति निप्रतिपदं प्रविष्ट इति ज्ञातं प्रागविदः पूर्वस्य द्यामाद्यः २३ कलेरन्तेन तं कृतयुग
प्रवेशमाह दिव्याह्नानामिति च तदेर्यकस्योत्प्रवेशनाह्वपरिमितेनोमोशेनाप्रिमहातीत्यर्थः कृतयु
गप्रवेशाविह्नमाह यदा नक्षत्राणां सतः ग्रात्मप्रकाशकं भविष्यति तदेति २४ राजवंशान्कालस्थिति
प्रमाणादिवंशोपयातिदिशति इत्याह इतियथायाभिरुक्तनीवावस्थाभिः नास्त्राप्रवत्स्यावेशाइति

यस्मिन्कृष्णो दिवं यातः तस्मिन्नेव तदाहनि प्रतिपन्नं कलियुगं इति प्राहुः पुराविदः २३
दिव्याह्नानां सहस्राणि च तन्नर्येनवनः कृते भविष्यति यदा नृणां मनश्चात्मप्रकाशकं २४
इत्येवमात्रेयवंशाय यास्यामास्यायनेऽभवि तथा विट्सूद्रविप्राणां नास्ति हेयाष्टपुणे युगे
२५ एतेषां लोमलिंगस्तेनाप्रच्छाणां महात्मनां कथामात्रावशिष्टानां कीर्तिरेवास्थिता
भुवि २६ देवापिः शौनतो प्रातानां मरुश्चेक्ष्वाकुवंशजः कलापग्राममासाद्य तेन महायोगब
लान्वितौ २७ तावेहेत्य कलेरन्ते वास्तदेवात्रपिंशितौ वर्णाश्रमयुतं धर्मं पूर्ववत्य
थापयिष्यतः २८ कृतत्रेताद्वापराख्यकलिशब्दितयुगे युगे अनेन क्रमयोगेन भुवि प्राणि
प्रवर्तते २९ राजन्नेते मया प्रोक्ता नरदेवाः तथापरे भूमेः प्रक्षेपितास्तेषां ममत्वं कृत्वा तेन
हित्वैमाति यतेगताः ४ भ्रिमिवेड्समस्तानेनाजगज्ज्ञापापियस्थव भूतथक्कुन्तेस्ता

चपादः २५ एतत्कीर्तेनस्यवैराग्यार्थयोगिनामाह एतेषामिति नामैवलिंगस्तापकं येषां तेषां क
थामात्रेणैवावशिष्टानां कीर्तिरेवास्थिता तत्पुत्राद्यो वा २६ कालान्तरस्थानां राजवंशा
दीनां पुनः पुनः प्रवृत्तिप्रकारमाह देवापिः सोमवंशजः कलापग्रामो नाम योगिनामावासः
प्रहमेवप्रकारं प्रतिवन्नुगपहप्रयोगिनिह तेनमिति २९ ४ समन्वेह तेषां तेन तपविने भूत
प्रोहापित्रिस्याभवतीति स्वयंति भ्रिमेति राजन्त्राप्रः रामेति नामपस्य नस्याप्रिदेहस्यानेत्रि मिविड्से
तिवासंस्तामविष्यानिनन्तवेनन दर्शयानडच पूर्वनेभ्योडद्धातिसर्किंस्वर्यवेदकनइत्यपदायाहेन

श्री॰
भा॰ द्वा॰
टी॰
८

ममत्वमहंकारं प्रपंचयति कथमितिसेयमखंडाभूः मे पूर्वजैः पुरुषैः धृतासतीइदानीमस्मद्वीव
संतीममपुत्राद्यैः कथंस्यादित्येवं ४२ उभौमहींकायंचअदर्शनंमृतास्ते ४३ उपसंहरतियेयइतित्रि
सर्वेचकथामात्राश्रियमाणास्तुकथामात्राहृताः ४४ इतिश्रीभावार्थेद्वादशस्कंधेद्वितीयः २
तृतीयेभूमिगीतंस्वराजदोषादिवर्णनं कलौकदोषभूयिष्ठेदोषहंत्रीहरेर्गतिः देहेदेहेनाभूमेव
ममतानुबंधनोःवृथाइत्युक्तं तदेवभूमिगीतैः प्रपंचयति दृष्ट्वात्मनीत्यादिनाआत्मनस्वनिग्रहस्थिर्यव्याज
येव्यग्रान् उपसृष्टान् होमत्सकारमाहग्रहो इति १ येनकामेनफेनोपमेपिंडेदेहेविस्रंभिताविश्वा

कथंसेयमखंडाभूःपूर्वैर्मेपुरुषैर्धृता मत्पुत्रस्यचपुत्रस्यमत्पूर्वावंशजस्य वा ४२ तेजोबन्न
मयंकायंगृहीत्वात्मतयाबुधाः महींममतयाचोभौहित्वांतेदर्शनंगताः ४३ येयेभूप
तयोराजंभुंजंतिभुवमोजसा कालेनतेकृताःसर्वेकथामात्राःकथासुच ४४ इतिश्री
भागवतेद्वादशेद्वितीयोध्यायः २ शुकउवाच दृष्ट्वात्मनिजयेव्यग्रान्नृपान्हसतिभू
रियं अहोमाविजिगीषंतिमृत्योःक्रीडनकानृपाः १ काम एष नरेंद्राणां मोघःस्याद्विदु
षामपि येनफेनोपमेपिंडेयेहिविस्रंभितानृपाः २ पूर्वंनिर्जित्यषड्वर्गंजेष्यामोराजमं
त्रिणः ततःसचिवपौराप्तकरींद्रानस्यकंटकान् ३ एवंक्रमेणजेष्यामःपृथ्वींसागर
मेखलां इत्याशाबद्धहृदयानपश्यंत्यंतिकेंतकं ४ समुद्रावरणांजित्वामांविश

सेतीतावदिश्वासंवीतत्वेतेयेजेषांनरेंद्राणांसएवकामोमोघएवस्यात् २ काममेवदर्शयतिद्वाभ्यां
पूर्वमितिइंद्रियार्थलंपटस्यनराज्यप्राप्तिः स्यात् इतिप्रथममिंद्रियषड्वर्गंनिर्जित्यराजमंत्रिणोजे
ष्यामः वशीकरिष्यामः सचिवादयः मान्याः करींद्राः हस्तिपाः तांश्चजेष्यामः कंटकान् प्रतिपक्षा
न् प्रसख्यपासप्रप्रकंटकानिति पाठः ३ एवंकेविदाशाबद्धहृदयाः ४ एवंकेचित्त्वनमीति
त्वापुनःतिरस्कृत्याब्धिंविशंतीति तदेवाभिंद्रयजयेनयेराज्यंसाधयितुमिच्छंतितेनतिमेदाइत्याह कि ॥
यदिति ग्रतमंतकनपश्यंतीत्यंतकं ५ ॥

८
राम॰

नरेवाह यामितिउ.रेवहेतिभूमिगीतेनकथयन् श्रीशुकर्षिः संबोधयतिकलाद्दृष्ट्वेतिन्नपादः
स्तंभः ९ अत्रदृष्टंस्मन्नेतत्पेवयंतिमत्सानइति २ रामेनामकश्चिद्राजा यद्वालोकद्धद्यादा
शय्येवनिर्दिष्टः ३ लोकंरावयतिरोदयतीतिलोकरावणः ११ ममयिउच्चैर्ममताकृतायेवर्णनेने
कालेनकथावशेषाःकृताः विभोइतिसंबोधनकृतरुद्दहेतिवत् १२ राजवंशानुकथनस्यतात्पर्यमा
ह कथाइमाइतिविज्ञानंविषयासारतासानंततोवैराग्यंतयोर्विवक्षयापरेशघोशुनानावचोविभूतीः

ममैवेयंमहीकृत्स्नानतेमूढेतिवादिनः स्पर्धमानामिथोघ्नंतिम्रियंतेमत्कृतेनृपाः ८ पृ
थुःपुरूरवागाधिर्नहुषोभरतोर्जुनः मांधातासगरोरामःखट्वांगोधुंधुहारघुः ९ तृणबि
दुर्ययातिश्चशर्यातिःशंतनुर्गयः भगीरथःकुवलयाश्वककुत्स्थोनैषधोनृगः १० हिरण्यक
शिपुर्वृत्रोरावणोलोकरावणः नमुचिःशंबरोभौमोहिरण्याक्षोथतारकः ११ अन्येचबहवो
दैत्याराजानायेमहेश्वराः सर्वेसर्वविदःशूराःसर्वेसर्वजितोजिताः १२ ममतांमय्यवर्तंत
कृत्वोच्चैर्मर्त्यधर्मिणः कथावशेषाःकालेनह्यकृतार्थाःकृताविभो १३ कथाइमास्तेक
थितामहीयसांविताय लोकेषुयशःपरेयुषां विज्ञानवैराग्यविवक्षयाविभोवचोविभूतीर्
नतुपारमार्थ्यं १४ यस्तूत्तमश्लोकगुणानुवादःसंगीयतेभीक्ष्णममंगलघ्नः तमेवनि
त्यंशृणुयादभीक्ष्णंकृष्णेमलांभक्तिमभीप्समानः १५ राजोवाच केनोपायेनभगवन्कले
र्दोषान्कलौजनाः विधमिष्यंत्युपचितांस्तन्मेब्रूहियथामुने १६ ...

वाग्विलासमात्ररूपाः परमार्थंपरमार्थंशुन्नकथनेनभवतीत्यर्थः १४ कस्तर्हिपुरुषार्थस्तत्राह
यः परमार्थतमाह यस्त्वितिनित्यंशृणुयादेनमाप्यभीष्टं १५ कलिदोषापचयेसतिभक्तेरसंभवं
मन्यमानः पृच्छतिकेनोपायेनेतिविधमिष्यंतिनाशयिष्यंति यथायथावत् १६ ॥ ॥

श्री॰
भा॰टी॰
टी॰
१

कलियुगे कः पुनरधर्मः इति वुभुत्सयाशङ्क्य नियुगानीति तृतीयेन शंसंगः श्रान्तेति कलिनाम्नयायुनः सृष्टि प्रलययकल्पयोः संहारस्थितिकल्पयोः नचायं वहिर्मुखः प्रशस्यादृश्याहकालस्येति १ नत्वन्युगधर्मा न्नावदाहद्वन्नइतिनिजनैस्तत्कालीनैर्जनैः दानमयागहेषनयाप्रभयदानेनत्वेवप्रथमस्वंधेशोषणाहेनाम विभोर्हेतुर्णास्यधर्मस्य १८ नदानीनजनानामाह संतुष्टाइतिमैत्राः शून्यमैत्रीयुक्ताः श्रमणाश्रान्ताभ्यासवैनः १९ अथ्यात्मरताश्चासयणाधिकाः २० सहनेनसमोहिंसामार्दयाश्रसंतोषेणतपः विग्रहेणदानमिति

प्रजानियुगधर्मा स्वभावे प्रलयकल्पयोः कालस्य स्वरूपस्यगतिंविलोमहात्मनः १ कृत
वाव कृतेनपूर्वनेतेधर्मः वनेषाान्नमानेहनः सत्यदयान्तयादानमितिपादाविभोर्गृप १८ संत
ष्टाः करुणामैत्राःशान्तादान्तास्तितिक्षवः आत्मारामास्समदृशः प्रायशः श्रमणाजनाः १९ त्रेताया
धर्मपादानांतुर्यांशोहीयतेशनैः अधर्मपादैरनृतहिंसासंतोषविग्रहैः २० तदाक्रियातपोनि
ष्टानातिहिंस्रानलंपटाः त्रैवर्गिकास्त्रयीवृद्धावर्णाब्रह्मोत्तरानृप २१ तपःसत्यदयादाने
ष्वर्धंह्रसतिद्वापरे हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः २२ यशस्विनोमहाशालाःस्वा
ध्यायाध्ययनेरताः आढ्याःकुटुम्बिनोहृष्टावर्णाःक्षत्रद्विजोत्तराः २३ कलौतुधर्महेतूनांतुर्यों
शोधर्महेतुभिः एधमानैःक्षीयमाणोह्यन्तेसोपिविनङ्क्ष्यति २४ तस्मिंल्लुब्धादुराचारानिर्दयाःशु
ष्कवैरिणः दुर्भगाभूरितर्षाश्चशूद्रदासोत्तराःप्रजाः २५ सत्त्वंरजस्तमइतिदृश्यन्तेपुरुषेगुणाः
कालसंचोदितास्तेवैपरिवर्तन्तआत्मनि २६ प्रभवन्तियदासत्त्वेमनोबुद्धीन्द्रियाणिच तदाकृ

यासंख्ययोःहिंसानृष्ट्यनृतद्वेषैरितियंक्रमोनविवक्षितः धर्मस्यार्धंह्रसतिक्षीयतेअधर्मस्यलक्ष
णैः विवृद्धैर्यादृशैस्तथैः २२ यशस्विनःकीर्तिप्रियाः वेदविदोमहाः क्षत्रियब्राह्मणप्रधानाः २३ क
लौधर्मपादानांतुर्यांशः चतुर्थोंशोवशिष्यते २४ शूद्रदासोत्तराः शूद्रकैवर्तादिप्रधानाः २५ गुणानामे
वेभ्यःनेदैषम्येकारणमाह सत्त्वमितिपंचभिः २६ सत्त्वबुद्धीन्द्रियाणिचसत्त्वेयदाप्रभवन्तिप्र
तिभायेनवर्तन्ते २२

यदा कर्मादिषु भक्तिः प्रीतिः तदा रजोवृत्तिप्रधानं त्रेतायुगं जानीहि २८ काम्यानां च कर्मणां विषयेषु यदा
प्रीतिः तदा रजस्तमः प्रधानं द्वापरं जानीहि २९ विषादनं दुःखं ३० कलिदोषान्प्रपंचयति यस्मा
दित्यादिना यस्मात्कलेर्हेतोः क्षुद्रदृशः मंदमतयः क्षुद्रभाग्याः महाशनाः बहुलाहाराः वित्तही
नाः अपि कामिनः स्वैरिण्यः स्वच्छंदाः असतीः असत्यः ३१ दस्यूत्कृष्टाः दस्युप्रधानाः ३२ अव्रताः
विहिताचारशून्याः अशौचाः शौचरहिताः ब्रह्मचारिणो भविष्यंति ३३ कुटुंबिनः सकुटुंबाः स्वयंभि

यदा कर्मसु काम्येषु भक्तिर्भवति देहिनां तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् २८ य
दा लोभस्त्वसंतोषो मानो दंभोथ मत्सरः कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः २९ यदा मा
यानृतं तंद्रा निद्रा हिंसा विषादनं शोकमोहौ भयं दैन्यं स कलिः तामसः स्मृतः ३० यस्मात्क्षु
द्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ३१ दस्यू
त्कृष्टा जनपदा वेदाः पाषंडदूषिताः राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ३२ अव्रता
बटवोऽशौचा भिक्षवश्च कुटुंबिनः तपस्विनो ग्रामवासा न्यासिनोऽत्यर्थलोलुपाः ३३ ह्र
स्वकाया महाहारा भूर्यपत्या गतह्रियः शश्वत्कटुकभाषिण्यः चौर्यमायोरुसाहसाः ३४
पणयिष्यंति वै क्षुद्राः किराटाः कूटकारिणः अनापद्यपि मंस्यंते वार्तां साधु जुगुप्सितां ३५
पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमं भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ३६

क्षा रतं पराभविष्यंति न तु भिक्षां दास्यंति तपस्विनो वनस्थाः वनं हित्वा ग्रामसाश्च भविष्यंति न्यासिनो
यतयः अतिलोलुपाः भविष्यंति ३३ पुनरपि स्त्रीणां स्वभावमाह ह्रस्वकाया इति कटुकभाषिण्यः
इति अप्रियभाषिण्यः अप्रियवादिन्यः चौर्यं च माया च कपटे उरुसाहसं यासां ताः ३४ किं च किराटाः
वणिजः पणयिष्यंति विक्रेष्यंति च सर्वे जनाः अनापद्यपि जुगुप्सितां निंदितां वार्तां वृत्तिं साधु मंस्यंते ३५ स
र्वोत्तममपि पतिं द्रव्यहीनं भृत्याः त्यक्ष्यंति पतयः स्वामिनः भृत्यं विपन्नं रोगादिभिः आपन्नं त्यक्ष्यंति कौलं कुलपरंप
रायातं त्यक्ष्यंति अपयस्विनीः अपदोहाः ३६ ॥

श्री॰ भा॰ द्वा॰ टी॰ ८

सौरतंसुरतनिमित्तंसौहृदंयेषांतेसुरतएवननंदारोभर्तृभार्याभगिन्याः स्यालाभार्याभ्रातरः तैसंवादोमंत्रो
लोचनंयेषांपिस्त्रैणाश्चस्त्रीवश्याः नेनंदृरितिपाठः ३७ काकिणिकेविंशतिवराटिकामात्रेप्यर्थेविग्रह
नेविगृह्यवैरंकृत्वा ४१ महांतमनर्थमाहद्वाभ्यां कलाविति त्रिलोकनाथैरवनतेनमस्कृते पादपंक
यस्यतंनतपादांतिनयाजयिष्यंतिपाषंडैर्विभिन्नमन्यथाप्रवृत्तंचेतोयेषांते ४३ विवशोगृणन्नवश्यंविमु
क्ताः कर्मरूपा अर्गलाः प्रतिबंधायस्मात्सः ४४ नरदेवकलिदोषान्प्रपंचनीज्ञाशस्त्रेतेनत्रिस्लाययोय

पितृभ्रातृसुहृज्ज्ञातीन्हित्वासौरतसौहृदाः ननंदृस्यालसंवादादीनाःस्त्रैणाःकलौनराः ३७
शूद्राःप्रतिगृहीष्यंतितपोवेषोपजीविनः धर्मंवक्ष्यंत्यधर्मज्ञाअधिरुह्योत्तमासने ३८ नित्यमु
द्विग्नमनसोदुर्भिक्षकरकर्षिताः निरन्नेभूतलेराजन्ननावृष्टिभयातुराः ३९ वासोन्नपानश
यनव्यवायस्नानभूषणैः हीनाःपिशाचसंदर्शाभविष्यंतिकलौप्रजाः ४० कलौकाकिणिके
प्यर्थेविगृह्यत्यक्तसौहृदाः त्यक्ष्यंतिहिप्रियान्प्राणान्हनिष्यंतिस्वकानपि ४१ नरक्षिष्यंति
मनुजाःस्थविरौपितरावपि पुत्रान्सर्वार्थकुशलान्क्षुद्राःशिश्नोदरंभराः ४२ कलौनराजन्
जगतांपरंगुरुं त्रैलोक्यनाथानतपादपंकजं प्रायेणमर्त्याभगवंतमच्युतंयक्ष्यंतिपाषंडवि
भिन्नचेतसः ४३ यन्नामधेयंम्रियमाणआतुरःपतन्स्खलन्वाविवशोगृणन्पुमान् विमुक्तकर्मा
र्गलउत्तमांगतिंप्राप्नोतियक्ष्यंतिनतंकलौजनाः ४४ पुंसांकलिकृतान्दोषान्द्रव्यदेशात्मसं
भवान् सर्वान्हरतिचित्तस्थोभगवान्पुरुषोत्तमः ४५ श्रुतःसंकीर्तितोध्यातःपूजितश्चा
दृतोपिवा नृणांधुनोतिभगवान्हृत्स्थोजन्मायुताशुभं ४६ यथाहेम्निस्थितोवह्निर्दुर्वर्णं
हंतिधातुजं एवमात्मगतोविष्णुर्योगिनामशुभाशयं ४७

माह पुंसामितित्रिभिः द्रव्यदेशात्मभिः संभवोयेषांतान् चित्तस्थः चित्तेस्फुरितः ४५ अयमेवोपा
योनान्यइतिदृष्टांतमाह यथेति धातुजंताम्रादिसंसर्गजातं हेम्नोदुर्वर्णंमलिनस्वभावंमालिन्यंतत्र
स्थितोवह्निरेवहरतिनत्वन्यानिद्रव्याणिएवंयोगिनामपिविलसेवनयोगादिकर्मतात्पर्यं ४७ ॥ ॥

राम॰ ८

यतस्त्वविद्यामलानिविद्यादयश्चोदितविरोधासना ४८ आत्मभावंस्वस्वरूपं ५० इदानींकलिंस्तौतिद्वा
भ्यां कलेर्दोषनिधेर्गुणमाहेति ५१ तत्सर्वंहरिकीर्तनादेवकलौभवति ५२ इतिश्रीभावार्थेद्वादशे
तृतीयः ३ चतुर्थेतुचतुर्धात्रप्रलयानैमित्तिकादयः तत्रसंसारविच्छेदोहरिकीर्त्येववर्ण्यते १ कलि
दोषनिवर्तनंतुहरिसंकीर्तनादेव एषएवपरमार्थः कलावितिमत्सुहृदयश्चोत्तरेऽध्याये यथान्यथेत्याह
प्रलयकल्पयामीनेच्छतीति तदिदानींतृतीयस्कंधोक्तकालाद्युवाचश्लोकेनिरूपयतिकालइति स
परमाणोर्वैयोऽशुक्तेः परमाणुनामित्यादिनाकालः कथितः चत्वारित्रीणिद्वेचैकंकृतादिषुयथाक्रमं

विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः नात्यन्तशुद्धिंलभतेऽन्तरात्मा
यथाहृदिस्थेभगवत्यनंते ४८ तस्मात्सर्वात्मनाराजन्हृदिस्थंकुरुकेशवं म्रियमाणोह्य
वहितः ततोयासिपरांगतिं ४९ म्रियमाणैरभिध्येयोभगवान्परमेश्वरः आत्मभावंनयत्यंग
सर्वात्मासर्वसंश्रयः ५० कलेर्दोषनिधेराजन्नस्तिह्येकोमहान्गुणः कीर्तनादेवकृष्णस्य
मुक्तसंगःपरंव्रजेत् ५१ कृतेयद्ध्यायतोविष्णुंत्रेतायांयजतोमखैः द्वापरेपरिचर्यायांक
लौतद्धरिकीर्तनात् ५२ इतिश्रीभागवतेद्वादशेतृतीयोऽध्यायः ३ शुकउवाच कालस्ते
परमाण्वादिर्द्विपरार्धावधिर्नृप कथितोयुगमानंचशृणुकल्पलयावपि १ चतुर्युगस
हस्रंतुब्रह्मणोदिनमुच्यते सकल्पोयत्रमनवश्चतुर्दशविशांपते २ तदन्तेप्रलयस्तावा
न्ब्राह्मीरात्रिरुदाहृता त्रयोलोकाइमेतत्रकल्पन्तेप्रलयायहि ३ एषनैमित्तिकःप्रोक्तः

मसंख्यातानिसहस्राणिद्विगुणानिपरार्धानिवेतियुगमानेचकथिते १ तत्रकल्पमानमाह चतुर्युगे
तियत्रचतुर्दशमनवःक्रमेणभवति २ प्रलयप्रलयवचतुर्विधः नैमित्तिकःप्राकृतिकआत्यन्तिकोनित्य
श्चेति तत्रनैमित्तिकप्रलयमानंसहितमाह तदन्तइतिद्वाभ्यांतावत् चतुर्युगसहस्रपरिमाणःसैवब्रा
ह्मीरात्रिः ३ नैमित्तिकत्वंदर्शयन्नियमयत्र्यविसर्गक श्रीनारायणःविश्वात्मसात्कृत्यस्वपितिशयनेश
यनेत्यात्मेश्वरंस्थापनास्मिन् प्राणनेनयोगाभेदविवक्षयावाक्ष्यप्रलयवाक्येतानेनत्वन्वयकं उपसंहारोनिद्रा

श्री॰
भा॰ द्वा॰
टी॰
४

प्राकृतिकं प्रलयमाह द्वाभ्यां द्विपरार्धे त्विति ब्रह्मणः सप्त महदहंकारपंचतन्मात्राणि ५ सं
घातः महदादिकार्यभूतः प्रकृतीनां तत्कार्यं ब्रह्मांडस्य च लयात्प्राकृतिक इत्यर्थः विघातका
रणे उपसादिते सति ६ तदेवाह पर्जन्य इत्यादिना षड्भिः दिव्यादिरूपेणेत्यर्थः सांवर्तकेन समुद्रा
दिकं सर्वं रसं रविः पिबते आकर्षति ७ अनिलभवेगोत्थः वायुवेगाद्भूतः अनिलवेगो वा इति पा
ठे अनिलेन वेगो यस्य सः रविणा रश्मिभिः पीतं सुद्रवं च दहतीत्यर्थः अनिलवेगो वा इति तु पाठः

एष प्राकृतिको राजन्प्रलयो यत्र लीयते अंडकोशस्तु संघातो विघात उपसादिते ६ प
र्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति तदा निरन्ने ह्यन्योन्यं भक्ष्यमाणाः क्षुदर्दिताः
७ क्षयं यास्यंति शनकैः कालेनोपद्रुताः प्रजाः ८ सामुद्रं दैहिकं भौमं रसं सांवर्तको
रविः दहत्यनिलवेगोत्थः शून्यान्भूविवरानथ ९ ततः संवर्तको वह्निः संकर्षणमुखो
त्थितः दहत्यनिलवेगोत्थ रश्मिभिः पिबते घोरैः सर्वं नैव विमुंचति उपर्यधः सम =
न्ताच्च शिखाभिर्वह्निसूर्ययोः दह्यमानं विभात्यंडं दग्धगोमयपिंडवत् १० ततः प्रचं ट
डपवनो वर्षाणामधिकं शतं परः संवर्तको वाति धूम्रं खं रजसावृतं ११ ततो मेघकुलान्यं
ग चित्रवर्णान्यनेकशः शतं वर्षाणि वर्षंति नदंति रभसस्वनैः १२ ततः एकोदकं वि पि॰
श्वं ब्रह्मांडविवरांतरं तदा भूमेर्गंधगुणं ग्रसंत्याप उदप्लवे १३ ग्रस्तगंधा तु पृथ्वी प्रलय॰ द॰
त्वाय कल्पते १४ अपां रसमथो तेजस्ता लीयंतेथ नीरसाः ग्रसते तेजसो रूपं वायुस्तद्रहि

स्थितः भूमिविवरान्पातालादीन्शून्यान् रविणा दैहिकरसाकर्षणात् प्राणिरहितान् १२
शिखाभिर्ज्वालाभिः १३ किंचिदधिकं वर्षाणां शतं सांवर्तकः परो वायुर्वाति तदा रजसावृतं खं
धूम्रं भवति ११ रभसस्वनैः नादगर्जितैः १२ ब्रह्मांडविवरांतरं ब्रह्मांडविवरमध्यगतं विश्वं एको
दकं एकार्णवो घोराकारं भवति १३ उदप्लवे उदकेन सर्वाविनेसति प्रलयत्वाय भावाय १४ ॥ ॥

राम॰
४

भूतादिस्तामसोहंकारः गुणैर्वृत्तिभिः सह १७ अव्याकृतं प्रधानं १८ तस्य तल्लयो नास्तीत्याह तत
स्यानिकाल्पस्य वैरहोगुणादिभिः गुणाभावविकाराः परिणामः विपरिणामः अव्यक्तं प्रतिलयविकार
शून्यं नित्यं सर्वदा एकरूपं षड्विकाररहितमित्यर्थः अव्ययमपव्ययशून्यं सर्वहेतुः कारणमिति १९ किंच
वागादीनां वरस्य सविशेषस्य विकाराभवेति इदं तन्मतयेत्याह तत्पंचतिष्ठाभ्यो लोकरूपः सन्निवेशोप्य व
नाविशेषः २० स्वप्नमजागरतत्स्वप्नजागरस्य स्वापेनसंसृभवत इंद्रियाद्यभावात् शून्यमाह अपहेतुः अप्रत
र्कतद्गुणः शून्यमेव तथा हृतवदिति २१ उपसंहरति लय इति शक्तयः सत्त्वादयः २२ आत्यंतिकलयमाह बु

लीयते चानिलं तेजो वायोः खं ग्रसते गुणं स वै विशति खं राजंस्ततश्च नभसो गुणं १८ शब्दं
ग्रसति भूतादिर्नभस्तमनु लीयते तैजसश्चेंद्रियाण्यंग देवा वैकारिका गुणैः १७ महान्ग्रसत्यहं
कारं गुणाः सत्त्वादयश्च ते ग्रसतेव्याकृतं राजन्गुणान्कालेन चोदितं १८ न तस्य कालावयवैः प
रिणामादयो गुणाः अनाद्यनंतमव्यक्तं नित्यं कारणमव्ययं १९ न यत्र वाचो न मनो न सत्त्वं तमो र
जो वा महदादयोमी न प्राणबुद्धींद्रियदेवता वा न सन्निवेशः खलु लोककल्पः २० न स्वप्न
जाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोग्निरर्कः संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमा
मनंति २१ लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा शक्तयः संप्रलीयंते विवशाः कालवि
द्रुताः २२ बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयं दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु
यत् २३ दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् एवं धीः खानि मात्राश्च न स्युरन्यतमादृ

द्धींद्रियेति द्वादशभिः आत्यंतिकलयो मोक्षः स च ब्रह्मज्ञानेन सर्वप्रपंचलयात्मकः तत्र प्रपंच
स्यासत्यत्वस्य सेलयः संभवतीति ज्ञानरूपाद्वस्तुनः पृथक्त्वस्यासत्वं प्रपादयति बुद्धींद्रि
याणि च अर्थाश्च तैर्वै ग्राहकग्राह्यरूपेण ज्ञानं तदाश्रयं ज्ञानमेव भाति न पृथक् तत्र हेतुमा
ह दृश्यत्वाव्यतिरेकाभ्यामिति यत्तेतायद्यंतवदवस्तु प्रत्येकं प्रयोगः विमतं सत् न भवति दृश्यत्वात् का
रणाव्यतिरेकात् आद्यंतवत्त्वाच्च स्वप्नादिवदिति २३ ॥ ॥

श्री॰
भा॰ टी॰
टी॰
२१

न तद्व्यतिरेकं दृष्टान्तेन प्रपंचयति दीप इति दीपवच्चक्षुरूपाणामेतेषां विशेषाणां यथा तेजसो न व्यति
रेकः तथा धीः करणानि विकारणानि मात्रा विषयाः एतेषामहंकारस्य च तस्य ब्रह्मकार्यत्वात्
नन्वेवं कार्यकारणयोरभेदात्कार्यासत्त्वे कारणस्याप्यसत्त्वप्रसंगेन तत्राह अन्यतमादिति कार्यादि
न्यत्वमान्यतिरिक्ताद्ब्रह्मणः पृथक्चाद्ब्रह्मणोऽस्ति व्यतिरेकः पृथक्त्वस्य तु नैवास्ति व्यतिरेक इत्यर्थः
२४ यदा तु नद्दीतिर्माशंक्याह मायामात्रमिति इदं विश्वं नेन सम्प्रातस्तुपे २५ प्राद्यन्तवत्त्वादित्यस्य
हेतोरसिद्धिमाशंक्य सावयवत्वेन साधयति यथेति अवयवीनि यत्सावयवं तदाद्यन्तवत् घटादि

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि २५
यथा जलधरा व्योम्नि भवन्ति न भवन्ति च ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात् २६
सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह विनार्थेन प्रतीयेरन् पटस्येवाङ्ग तन्तवः २७ यत्सा
मान्यविशेषाभ्यामुपलभ्येत स भ्रमः अन्योन्यापाश्रयात्सर्वमाद्यन्तवदवस्तु यत् २८ ॥

वदित्यर्थः अवयवोदयाप्ययात् आद्यन्तवदिदं संभवतीत्यर्थः वृत्तादृष्टमेवागमायाथित्वादि दृष्टमि
वदित्यर्थः तदेव स्पष्टयति यथा जलधरा व्योम्नीति ह
ष्टान्तब्रह्मणस्तु न स्वधित्वात् सत्यमित्येतेन साधनेऽदृष्टान्तस्य प्रवोक्तपव यथा जलधरा व्योम्नीति ह
ष्टान्ते न स्वात्मा मायायित्वविधिनमात्रेणेतन्मिथ्यात्वे इति २६ अन्यतमादर्तनादिति यनिस्तानेकारणा
स्स सत्यत्वमुपपादयति सत्यं हीति अवयवः कारणं प्रोक्तः वाचारंभणं विकारो नामधेयं मृत्तिकेत्ये
वसत्यमित्यादिश्रुतिभिः अवयविनामपि दृश्यानि विनेति अर्थमहेराजन् हिर्यस्मादर्थेन अवयविना
पृथगेवावयवाः प्रतीयेरन् २७ ननु कार्याभावे कारणत्वं ब्रह्मणः कथमवरेन सत्येन दृष्यित्वाजीवस्य
मिन्नाह यदिति सामान्यं कारणं विशेषः कार्यं तद्रूपेण अन्योन्यापाश्रयात् परस्परानपेक्षत्वा
दनित्यरूपत्वासहत्वादित्यर्थः अतः कारणत्वमवधित्वव्यापकत्वमित्यादिकमपि यत्तदपेक्षत्वात् आर
व्यत्ववत् तत्सर्वमवस्त्वित्यर्थः यद्वा तत्रैव हेत्वन्तरमेतत् यदुपलभ्येत स भ्रमः सामान्यविशेषरूप
त्वात्स्वप्नवत् अन्योन्यापाश्रयत्वात् इतीदमपि हेत्वन्तरं गुणागुणविशेषणविशेष्यवाध्यव्यापकत्वादि

श्रीमद्भागवतस्कन्धे भावार्थदीपिकायां टीकायां ॥२१॥

तदेवमनेकैर्हेतुभिः प्रपंचस्यासत्वे प्रसाधिते नन्वत्र शंका नन्वप्रपंचस्यापि प्रकाशमानत्वात् आत्मवत्स
त्वंकिं न स्यादिति तत्राह विकार इति ख्यायमानः प्रकाशमानोपि विकारः प्रपंचः प्रत्यगात्मप्रकाशं
विनाणुमात्रोपि न रूप्योस्ति नंविनो निरूप्यः स्यात्तेन तर्हि सोपि चित्समः स्यात् चिद्रूपेणात्मनास
मः स्वप्रकाशो भवेत् तथाच सति सोप्यात्मवत्स्यात् एवंरूपः स्यादित्यर्थः २९ ननु इत्यत आह
नहीति ननु सत्यस्याप्यात्मनो जीवब्रह्मरूपेण नानात्वमस्त्येव तत्राह यद्येवं नानात्वं मन्यते तर्ह्यविद्वान्
कथं तर्हि तयोर्भेदव्यवहारः उपाधिकृत इत्याह नानात्वमिति नच छिद्रयोर्घटाकाशमहाकाश
योरिवेति परिच्छेदापरिच्छेदे दृष्टांतः ज्योतिषोराकाशजलस्थसूर्ययोरिवेत्युपाधिकृतविकार

विकारः ख्यायमानोपि प्रत्यगात्मानमंतरा न निरूप्योस्त्यणुरपि स्याच्चेच्चित्सम आत्मवा
त् २९ नहि सत्यस्य नानात्वमविद्वान्यदि मन्यते नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातयोरि
व ३० यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु एवं वचोभिर्भगवान
धोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः ३१ यथा घनोर्कप्रभवोर्कदर्शितो ह्यर्कांश
भूतस्य च चक्षुषस्तमः एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः ३२

सदसद्भावे वातयोर्बाह्यशरीरस्थवाय्वोरिवेति क्रियाभेदव्यवहारेणैव प्रपंचव्यवहारालंबनत्वं दृष्टांते
न स्पष्टयति यथेति ३० क्रियाभिः तत्तद्वर्णनाभेदैः बहुधा कटककुंडलमालादिना लोकोद्यादिरूपेण
लौकिकवैदिकैर्वाग्भिर्जनैरहंकारोपहितैः ३१ ननु अहंकारस्य कथं ब्रह्मस्वरूपावरणेन भेदव्यवहा
राहेतुत्वं तस्य स्वकारणभूतब्रह्मावरकत्वासंभवात् आवरणे वा स्वस्यापि प्रकाशासंभवादित्या
शंक्य सदृष्टांतमाह यथेति सर्वं रूपमयमेव चक्षुरूपेण परिणामविशेषेति अग्नौ प्रास्ताहुतिः सम्य
गादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यादिवचनात् तस्मादर्कप्रभवः अ
र्केणैव दर्शितः प्रकाशितश्च तमः स्वरूपभूतार्कदर्शनप्रतिबंधको भवति अहंकारो ब्रह्मगुणः ब्रह्म
कार्यभूतः तदीक्षितस्तेनैव प्रकाशितश्च आत्मनो जीवस्यात्मबंधनः ब्रह्मस्वरूपदर्शनप्रतिबंध

टीप्पणी ४२

श्री॰
भा॰ द्वा॰
टी॰
११

अत एवाहंकारमात्रोपसद्रूपदर्शनं भवतीति तेनैव दृष्टान्तेनैवाह चन इति आत्मन उपाधिच्छेदात्स्या
विचारेणान्तर्हितं वा अनुस्मरेत् ब्रह्माहमिति प्रतीयतीत्यर्थः ३३ सोयमात्यन्तिकः प्रलयः इत्युप
संहरति यदैवमिति विवेकहेतिना ज्ञानखड्गेनाहंकरणमेवात्मबंधनं छित्त्वा परिच्छिन्नमात्मा
नमनुभवतीति तथा ३४ नित्यप्रलयमाह नित्यदेति ३५ ऊन इत्यत आह कालइति परिणामि
नां नदीप्रवाहप्रदीपज्वालादीनां या उत्पत्त्यवस्थाः ताः कालरूपस्रोतसो वेगेनाशु ह्रियमाणस्य
देहादेः दृश्यमानाः तदेव नित्यदा जन्मप्रलयहेतवो भवंति इति ३६ देहः प्रतिक्षणं प्रध्वंसी प्रतिक्ष
णमवस्थाभेदस्याविद्यमानत्वात् प्रदीपादिवदृश्यमाने यदि प्रतिक्षणमवस्था भवंति नहिं नाथिं

येनोपदर्शकश्च भवो व्यतिरिक्तोयं नेचरत्स्वरूपं विमोक्षे तदा यदाप्यहंकारउपाधिरात्मनो
जिज्ञास्यमानममानं नश्चेतत्तदानुस्मरेत् ३३ यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्म
बंधनं छित्त्वाच्युतात्मानुभवोवतिष्ठते तमाहुरात्यंतिकमंग संप्लवं ३४ नित्यदा सर्व
भूतानां ब्रह्मादीनां परंतप उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ३५ कालस्रोतोज
वेनाशु ह्रियमाणस्य नित्यदा परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ३६ अनाद्यंत
वतानेन कालेनेश्वरमूर्तिना अवस्था नैव दृश्यंते वियति ज्योतिषामिव ३७ नित्यो नैमित्ति
कश्चैव तथा प्राकृतिको लयः आत्यंतिकश्च कथितः कालस्य गतिरीदृशी ३८ एताः कु
रुश्रेष्ठ जगद्विधातुर्नारायणस्याखिलसत्त्वधाम्नः लीलाकथास्ते कथिताः समासतः का

नरस्वरूपेण अनाद्यन्तत्वसिद्धस्वरूपं वाह अनाद्यन्तवता कालेन जायमाना अवस्था नैव लक्ष्यन्ते आ
काशे गच्छतां ज्योतिषां चंद्रादीनां गमनावस्थाविशेषा नैव लक्ष्यन्ते तद्वत् अतो यथा तेषां प्रदेशांत
रप्राप्त्या गत्यवस्थाः कल्प्यन्ते तद्वदत्रापि बाल्ययौवनादिदर्शनेन मध्यवर्तिन्योवस्थाः कल्प्यन्त इ
ति महेतुरसिद्धरूपत्वः ३७ उपसंहरति नित्य इति चत्वारोऽप्युपसंहृताः प्रतनाः इति ३८ लीलाविष
याः कथाः अजो ब्रह्मापि कार्त्स्न्येनाभिधातुं नेशः ३९ ॥ ॥

राम॰
॥

तत्पद्यानि साकल्येनाभिधातुं न शक्यन्ते तर्हि किं तदभिधानेनेत्याह संसारेति विविधदुःखमेव दवो
दावानलैः तेनार्दितस्य उत्तितीर्षोः पुंसः श्रीभगवतो याः लीलाः तासां कथाः तासां रसः तन्निषेव
णं तेन विना प्लवः नान्यः उत्तरणसाधनं नास्ति भवेत् उपायान्तरासंभवात् तत्कथाश्रवणमेव मया शक्ति
विधया अमित्यर्थः ४० श्रीनारायणादेवायं संप्रदायप्रवृत्तिमाह पुराणसंहितामिति त्रिभिः ४१ सवैबाद
रायणः प्रीतः सन् इमां संहितां प्राह तेन पूर्वेणान्वयः ४२ अतोसौ सूत इति गुरुतः प्राप्तिं निर्दिशन्नाह नै
मिषालये नैमिषारण्ये ४३ इति भावार्थदीपिकायां द्वादशे चतुर्थः ४ पंचमेन समासेन परब्रह्मोपदेशा
तः राजनस्तक्षकदंशान्मृत्युभीतिनिवारणं यतो पुराणश्रवणमभयं शमो नेत्यभिप्रेत्य पुराणार्थम्

संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य लीलाकथारसनि
षेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ४० पुराणसंहितामेतामृषिर्नारायणो
ऽव्ययः नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ४१ स वै मह्यं महाराज भगवान्बादरायणः
इमां भागवतीं प्रीतः संहितां वेदसंमितां ४२ इमां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिषालये दी
र्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः ४३ इति श्रीभागवते द्वादशस्कंधे परमार्थनिर्ण
यो नाम चतुर्थः ४ शुक उवाच अत्रानुवर्ण्यतेभीक्ष्णं विश्वात्मा भगवान्हरिः यस्य प्रसा
दजो ब्रह्मा रुद्रः क्रोधसमुद्भवः १ त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि न जातः प्राग
भूतोद्य देहवत्त्वं न नंक्ष्यसि २ न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान् बीजांकुरवद्देहा
ददेहादिव्यतिरिक्तो भाव्यसि । तद्भावो मोक्षः तथापि प्रसादजः प्रसाद एव ज्ञानं ब्रह्मैव विद्धि नतो मान
मनुस्मारयति अत्रेति तद्वदेवाः अत्यंतं नेदं वस्तु ग्राह्यं च सर्वोपाधिव्यतिरिक्त भगवाननन्तरूपेणैव तत्
स्यात्मत्वं तत्त्वं सत्त्वं सहजः ईदृशस्य तस्य कोपसंभवात् सत्त्वं च सर्वस्यात्मा भगवानतः श्रुत्यैव नेश्वरत्
त्वं चैतन्य श्रीभगवत्प्रपत्तेन कृतो नान्यस्माद्भयं भवतीति १ त्वं तु इति पशुबुद्धिं देहात्मबुद्धिं
मत्वा देहे यस्मात्त्वं नंक्ष्यसि कुतः यतो न जातः इति यथा देहः प्राक्पूर्वं अभूतः अद्य जातो नत्वन्वे
वंभूतस्त्वं नाशं प्राप्तस्ततो न नंक्ष्यसि २ न च बीजांकुरवत् तस्मात्संततरूपेण तस्य
वत्सल्पं तत्त्वनाशः न वा प्राज्ञानामस्ति प्रज्ञानां तेन त्वं न नंक्ष्यसि यथा पुत्रेणापि
भवन्नपि यथा बहुधा तिः ततः पुनरंकुरात् द्विजो भवतीत्यादि उपपत्त्यापि स्वयमेवासि पिता पुत्रेणापि

श्री०
भा० टी०
२२

नृणामन्यान्नियोनाविनिश्चितेः अतस्तेष्वन प्रसक्तं वक्तव्यं त्वामीति वेन न जातः न भविष्यसि इति सूत्रं पुत्र
पौत्रादिरूपवान् बीजाङ्कुरवत् न भविष्यसि यस्माद्देहादेः व्यतिरिक्तस्त्वं यथानलः काष्ठात् देहादेर्ना
शयत्तेनात्मनि भावः ३ तन्मात्रादीनां देहधर्मत्वं दृष्टान्तेन प्रपञ्चयति स्वप्ने यथात्मनः शिरःछेदं स्वयं पश्य
ति एवं जागरेऽपि अस्माद्देहस्य पञ्चत्वादिकं पश्यति ततस्तद्द्रष्टत्वात् आत्मा न देहः भ्रममात्रे च स्वतः त्वात्मा
नो मरणं त्वर्थः तदुक्तम् आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ भवाप्ययवस्तूनामभिज्ञो द्वयल
क्षणः इति ४ तस्माद्देहोपाधिकोऽयमात्मनो जन्मादिसंसारभ्रमः तस्मादुपाधिनिवृत्तौ ब्रह्मैवासि इति स
दृष्टान्तमाह घटे इति यथा घटाद्युपाधेः पूर्वमपि घटे भिन्ने तदनन्तरं च आकाश आकाश एव स्यात् यथा
एवं देहे मृते तत्र स्थानी लीनः सन् ति ५ ज्ञानेन लयं संभावयितुं मायाकृतमात्मनो देहाद्युपाधिसंबन्धमाह

स्वप्ने यथा शिरःछेदं पञ्चत्वाद्यात्मनः स्वयं यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ४
घटे भिन्ने यथाकाश आकाशः स्याद्यथा पुरा एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ५ मनः
सृजति वै देहान् गुणान् कर्माणि चात्मनः तन्मनः सृजते माया ततो जीवस्य संसृतिः ६ स्ने
हाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ततो दीपस्य दीपत्वमेवं देहकृतो भवः ७ रजः
सत्त्वतमोवृत्त्या जायतेऽथ विनश्यति न तत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परः ८ आ
काश इव चाधारो ध्रुवोऽनन्तोपमस्ततः एवमात्मानमात्मस्थमात्मनैवामृश प्रभो बुद्ध्यानु

मानगर्भिण्या
वासुदेवानुचिन्त

एवं देहाद्युपाधिस्थितमात्मानं विचारय बुद्ध्यानुमानगर्भिण्या दृष्टदृष्टान्तव्यतिरेकतर्कयुक्तया २

तमाह मनस्त्वात्मनो देहादीन् सृजति तच्च मनो माया सृजति ततो मायाद्युपाधिसमुदायात् ६ एत
देव सदृष्टान्तमाह स्नेहेति दीपस्य ज्योतिषो दीपत्वं ज्वालाक्रमः परिणामः तत्र तैलस्थानीयं कर्म त
दधिष्ठानस्थानीयं मनः वर्तिस्थानीयो देहः अग्निसंयोगस्थानीयाध्यासात् दीपस्थानीयः संसारः इति
योऽयं देहकृतः देहनिबन्धनः यद्वा देहकृतो मनसा न त्वात्मनः ७ अतो दीपवत्संसारः एवं नश्यति न
त्वात्मज्योतिरित्याह नेति न तत्र उत्पद्यमानस्य आत्मा अतः न उत्पन्नस्य आह इति व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदे
हयोः परः अन्यः यतः स्वयंज्योतिर्व्यक्तिरूपापरत्वं प्रपञ्चयति आकाश इति आधारो देहादेः प्रपञ्चस्य ध्रु
वो निर्विकारः नास्यान्तः उपमा च यस्यासौ अनन्तोपमः ततो विभुः ८ अतस्त्वमेवं ब्रह्मेत्याह एवमिति आत्म

एवंब्रह्मनिनत्सकोनहङ्केन इत्याहबोद्विनइनितबहेतवः शृणुबइतिशृणुहेतवः १० विमर्शप्रकारंप्र
दर्शयन् तत्त्वकोऽहंइत्यत्ति ह्यभ्यांश्लोकाभ्यां योहंसब्रह्मैवयद्ब्रह्मनदहमेवेतिसमीक्षन् नयाहेत्वा
स्मैतिभावनयाजीवस्यब्रह्मकारितिद्धिः अस्याहमितिभावनयावब्रह्मणः परोक्षतिर्वहतिसर्वतिव
निवृत्तारहोनः निष्कलेनीरूपादेरात्मानिब्रह्मणि ११ विषबुद्धेः ननैरदंशनेनग्रसनेनतक्षकंलेलि
हानंसर्पंपदलेलिहानंजिह्वाभिरोष्ठप्रामसंस्पृशति शरीरमात्मादर्यंतंयात्मनःपृथक् १२ श्रीहरेर्विश्वात्मा
त्मनः यत्पृष्टवान् नरदेवनेत्रैकोपितत्सर्वतस्यहतस्तनापरीक्षणायसकृत्कृतविविमिति १३ इतिश्रीभागवतभावा
र्थेद्वादशेपंचमोध्यायः षष्ठेपरीक्षिन्मोक्षः सर्पहोमादिनस्तनाव वेदशाखाविभागोवाक्याविस्तरात्

वोहिनोविप्रवाक्येनननंक्ष्यत्यतितक्षकः शृणुवानोपथदंतिशृणुतांशृणुमीश्वरं १० अहं
ब्रह्मपरंधामब्रह्माहंपरमंपदं एवंसमीक्षन्नात्मानमात्मन्याधायनिष्कले ११ दशंतंतक्षकं
पादेलेलिहानंविषाननैः नद्रक्ष्यसिशरीरंचविश्वंचपृथगात्मनः १२ एतत्तेकथितंतात
यदात्मापृष्टवान्नृप हरेर्विश्वात्मनश्चेष्टांकिंभूयःश्रोतुमिच्छसि १३ इतिश्रीभागवतेद्वादशे
पंचमः ५ सूतउवाच एतन्निशम्यमुनिनाभिहितंपरीक्षिद्व्यासात्मजेननिखिलात्म
दृशासमेन तत्पादमूलमुपसृत्यनतेनमूर्ध्नाबद्धाञ्जलिस्तमिदमाहसविष्णुरातः १ राजो
वाच सिद्धोस्म्यनुगृहीतोस्मिभवताकरुणात्मना श्रावितोयच्चमेसाक्षादनादिनिधनो
हरिः २ नात्यद्भुतमहंमन्येमहतामच्युतात्मनां अज्ञेषुतापतप्तेषुभूतेषुयदनुग्रहः ३
पुराणसंहितामेतामश्रौष्मभवतोवयं यस्यांखलूत्तमश्लोकोभगवाननुवर्ण्यते ४ भ
मात्कृतिरत्नवंवनत्वाणि प्रस्थायानेतावं चनस्यैव स्मृत्वा स्मितेन निरीक्षितो पांग
निर्हारोन २१ प्रयतेन वालकेवीक्षतेनापाकपि हितेन रद्दि संभूयापानि सलिलेशः परिष्व
मोयोत्तने २२ तावत्सभगवान्साक्षात्सा योगाधीशो गुहाशयः अन्तर्दधेऋषेस्सद्योयथे
हानीशनिर्मिता २३ तमन्वथ वटोब्रह्मसत्सलिले लोक संप्लवः तिरोधाय क्षणादस्य
स्वाश्रमेपूर्ववत्स्थितः २४ इति श्रीभागवते द्वादशे भगवन्मायादर्शनेनाम नवमः ९
सूत उवाच सएवमनुभूयेदं नारायणविनिर्मितं वैभवं योगमायायास्तमेव शरणं ययौ १
मार्कण्डेय उवाच प्रपन्नोस्म्यङ्घ्रिमूलं ते प्रपन्नाभयदं हरे यन्मायया हि विबुधा मुह्यन्ति
ज्ञानकोशोपि तत्र २ यामिनाथरावणहे

विश्वेनाहितः स्ववस्ताश्रमेस्यपाचूर्ववेस्थितइति २४ इति द्वादशे नवमः ९ दशमे शिवया गतस्य तेना
स्मितेनावलनरात तेन सावकनतिग्रीवास्समाभाष्य समाजयत् ज्ञानकोशया स्तानत्वस्वशमानमा
तद्दर्शनं विनाविशेषोप्य स्यानवमात्मा तिनोवच्यमिति ग्रहेकारेणपुरतीतेर्थः २ ज्ञानराज्या
ताः एवं स्वमायादर्शनप्रश्रिते शिव रूपेणासेव्ययामास तदाहमिति तमेव अन्यादिनानि भूता
त्मानं समाहितनविशेषज्ञाप्राणामावात्मा ३ ॥

रामः
२४

निशुंनानि सुखसाधारणोस्मिंदियाश्रया: देहेंद्रियमनोभिर्यस्य न निशृंभनिस्पृल शुद्धं देव ज्ञानस्वरूपा
निशृंनानि सुखसाधारणोस्मिंदियाश्रया: देहेंद्रियमनोर्वियस्यानं निशृंनेनिस्थलशुद्धं देहं स्वज्ञानस्वरूप।
स्मिन्नः ससिद्धिफलेसाधारणं ब्रवीति भवान् सिद्धिः स्राक्षिस: शुभ्रं दयलेनणादनास्मि
न शृंन्न: भक्तिमिति ८ संविद्वेषाम: सर्वात्मका स्थाम: सानुलोमगानितिर्हि न: ईश्वानइति ८
न: शृंन्न: भक्तिमिति ८ संविद्वेषाम: संवादेकरियाम: सानुलोमगाति तिहिन: ईशानइति ८
रुद्राधिपतिन: करणास्य स्वयायेनस: ९ नवेवक्लेवहि देवानामन्यासांभिंभिवं वदस्यविवदस्यविधि
सुखोमानन्द शुभ्रं वीदासिरिशो सम्भाषन यन्न्येभ्यं भगवन्निश्चं निशुनात्मेंद्रियाश्रयं च
सुखोमानन्दशुभ्रं वीदासिरिशोसमभाषन यद्येभ्यंभगवन्निशृंनिशुनात्मेंद्रियाश्रयं च
निशृंमोरद्रुषश्चानिवातायायेययातीव: रुद्रंवस्तनयःसातासांसिद्धिंसिद्धिदाभवान्
५ श्रीभगवानुवाच नैवकुत्यात्रिभि: कोपिवस्याधिमोदयमगुन भक्तिपरंभगवति
लब्धवान्सुरवैवाथे ८ अथापिसेवद्विषामीभवान्येनेनसाधुना अर्थयंहिपरमालाभो
न्नणोसाधुसमागमः ७ सूतउवाच इत्युक्तानपयाययभगवांसास्वतांपतिः ईशानाः
सर्वविश्वात्मीक्षाः सर्वदेहिनां ८ नयोनगमनेसासादीशायोनिगदात्मनोः नैवरुद्रे
पीहवित्रात्मानंविश्वमेवच ९ भगवान्स्त्वदभिताययिरः शोयोगमायया आविश्यमहे
हाकाशावायुःक्षितिर्हमिवयुः १० आत्मन्यपितिशिवंयामेनदितिगजस्यायरे सुहंद
गुणभुनयांस्युद्धंनमिवभाल ११ व्याघ्रचर्माम्बरंशूलंधनुरिषुमसिचर्मभि: शुद्रमा
लाक्षमक्ववाकयालपरशुंसह विश्राणंसहसाभानेविवहस्हदिविस्मितः १२ किमिदं
कुसएवेतिसमाधेविरतोमुनि नेत्रेउन्मील्यददृशेसगणंसामयागतं १३ रुद्रंत्रिलोके
कगुरुंननामशिरसामुनिः तस्मैसपर्यांव्यदधात्सगणायसहोमया १४ स्वागतामन
यासद्यंगंधस्रग्धूपदीपकैः आहत्वात्मानुभावेनपूर्णकामस्यतेविभो करवामकि
नः कृपणोभवहृत्साधवः स्वादेवन्दिमानं नडिहत्यिशावमदादारयतीतिने शोणिताय्तीतियस्ता
नः कृपणोभ्रमहत्साक्रकस्मादेवस्रुदिमानेन डिहत्यिशायजदायायतीतिने शोणितयाद्दी तियस्य
नमूलादिभिः सहश्रुद्रमालादीविश्राणमित्यन्वयः श्रुलमालादीनां हेकां १२ विस्मयएवेवं
वहिंदेशीनमाह किमिदमनिसामयाउसयामहमनकर्देहद्दो १३ ननोनन्नमस्ते पूर्णकामर

श्री॰
भा॰
टी॰
२५

निर्गुणत्वेऽपि गुणत्वेन नमस्करोति नमः शिवायेति निर्गुणाय सत्त्वाय सत्त्वाधिष्ठात्रे अतएव शुद्धत्वेन शान्ताय १६ नोऽस्माकं त्रयः वयं त्रिमूर्तयः यत् येभ्यः नेक्षध्वे १८ वरदानादिना
भवत्स्वैवास्माभिश्चिकीर्ष्यते न तत्र स्वार्थः जगद्धितत्वात् भवतामभिनिवेशाद् यत्नात् लौकिकाः सुखोल्ल
इत्यादिना साधवः सदाचाराः शान्ताः नामसंसारादि रहिता निष्ठामार्तिः संगाः न केवलैर्नैपवकिंचा
ग्रहं वैसादिना २० ह्यम्पतमत्वेहस्वेन रमाहुतेनेति अतएव पिण्मात्रमपि च दृष्टेन पश्यन्ति यद्यद्याम्नेवं स्व

नमः शिवाय शान्ताय सत्त्वाय प्रमृडाय च रजोजुषेऽथ घोराय नमस्तुभ्यं तमोजुषे १६
सूत उवाच एवं स्तुतः स भगवानादिदेवः सतां गतिः परितुष्टः प्रसन्नात्मा प्रहसंस्तमभा
षत १७ श्रीभगवानुवाच वरं वृणीष्व नः कामं वरदेशा वयं त्रयः अमोघं दर्शनं येषां
मर्त्यो यद्विन्दतेऽमृतं १८ ब्राह्मणाः साधवः शान्ता निःसंगा भूतवत्सलाः एकान्तभक्ता अ
स्मास्वभिनिर्वैराः समदर्शिनः १९ सलोका लोकपालास्तान्वन्दन्त्यर्चन्त्युपासते अहं च भ
गवान्ब्रह्मा स्वयं च हरिरीश्वरः २० न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते नात्मनश्च
जनस्यापि तद्युष्मान्वयमीमहि २१ न ह्यम्मयानि तीर्थानि न देवाश्चेतनोज्झिताः ते पु
नन्त्युरुकालेन यूयं दर्शनमात्रतः २२ ब्राह्मणेभ्यो नमस्यामो येऽस्मद्रूपं त्रयीमयं बिभ्र
त्यात्मसमाधानतपःस्वाध्यायसंयमैः २३ श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि वः
शुद्ध्येरन्नन्त्यजाश्चापि किमु सम्भाषणादिभिः २४ सूतः इति चन्द्रललामस्य धर्मगुह्योप
बृंहितं वचोऽमृतायनमृषिर्नातृप्यत्कर्णयोः पिबन् २५ स चिरं मायया विष्णोर्भ्रामितः

नान् ईमहि भजेम २१ अम्मयानि जलमयानि २२ ब्राह्मणान् आत्मसमाधानेन चित्तैकाग्र्येण तपआलोचनेन स्वाध्या
यः स्वशाखाध्ययनेन संयमाः वागादिनिग्रहाः तैः २३ किं च श्रवणादित्यादि २४ चन्द्रललामो रु
द्रस्तस्य धर्मरहस्येनोपबृंहितमुपबृंहितं वचः कर्णाभ्यामपिबत् नातृप्यत् अतृप्यदिति मानन्त्येनक
र्णयोरमृतायनमिति वा अन्वयः २५ शिवस्य वागेवामृतं तेन ध्वस्ताः क्लेशपुञ्जा यस्य सः २६ ॥ ॥

राम॰
२५

इयंलीलाद्वर्विभाव्या अवितर्क्यं यथार्ह ईशिनव्यानियस्मानिश्रुनान्हिजगदीश्वरः स्वयंनिर्मितस्त्वं
निवेति २० अथवालोकसंग्रहमात्रमेनदित्याह धर्ममिति अवज्ञारोपियत्त्वयं देहिनो धर्ममावरति
२८ नत्वेनत्वमावतिरस्कारः कथंमयाक्रियते नशहनेनिपनावनालोकसंग्रहमात्रेणनिंमनादि
मिः कथंभूतैः समायामयीहक्रियैश्चनैः श्रीभगवनेममायिनस्तवकामभावोनदुष्येत यतः प्रसिद्धस्यमा
यिनः ऊहवं कथंयथातश्चेनानिनृमनादीनिश्चनस्तस्य यथाऊहवंकेनात्मानुभावोदुष्यत इतिनहन
प्रदर्षितेनिपाठेनकारस्य हेतोमात्रंयतः २९ मायाविहितेनप्रपंचयति सृष्टिं स्वमहस्यप्रथनाविपा

ऋषिरुवाच प्रह्लादोईश्वरवर्यंतुविभाव्यापृथीरितो यत्रमंनीषिणव्यानिस्त्वंवनिजगदी
श्वरः २० धर्मंग्राहयितुंप्रायः प्रवक्तारश्चदेहिनो आचरंतिनमोहेनेक्रियमाणस्त्वंवनिव २८
नेनावकाम्यावनःस्वमायानयहत्रिभिः नदुष्येत्तावनुभावस्तेमायिनःऊहवंयथा २९ स
हेतमनशादिसुमात्मनानवविभुयय: गुणोऽनुवेद्रिशमानिवनृवन्त्वमहत्पथा ३० नसे
नसोमहावलेवित्रिगुणायगुणात्मने केवलायाद्वितीयायगुरवेब्रह्ममूर्तये ३१ कंवृणीत्वरं
श्रुमन्वरंवदरदेशमानत यद्दर्शनात्स्वीकामःसनाकामःशुभोभवेत ३२ वरमेकंवृणेऽथापि
पिहूत्रीकामाभिवर्धणात भगवत्याजभक्तिंतत्परेषुतयापयि ३३ सूतः इत्यर्चितोभि
हूनस्त्रमुनिनासूनयागिरा तमाहभगवान्शर्वः शर्वयाचाभिनोदितः ३४ कामस्तेयंम
हृषेस्त्वभक्तिंमास्त्वमथोदंते आवंल्यातायशः अणमजरामरजानतया ३५ ज्ञानंत्रैकालि
केवलस्त्यान्तिज्ञानेचविरक्तिंमत ब्रह्मवर्चस्विनोभूयोऽस्तुगणाचार्यतास्तने २६ स्तनः परंच

वैशिनेहशोनः ३१ त्रिगुणातीतजीवनदभिभूतयाधिकं तगुणानामात्मनेनिर्यये ३१ वरंहणोषिनिपट
के नयाहकामितिवरंवरेदर्शनेयस्य तस्मात्तत्वतः परंवरंतहणायस्यानवदर्शनात्स्वीकामः सर्वानेहस
रोहत्रयः सम्यकामेयपोहणामसर्वानेहः ३२ वरदानायस्वयमेवप्रहृत्तः शर्वयाउमयावाभिनेदितःप्र
तमोदितः सतचाह ३४ कामायसर्वोपियम्यत्वगुणयथाः इत्यादिब्रह्मवर्चस्विनस्तेशुयादिगुणरेणा
लयः यतस्त्वमथोदतेभक्तिमान ३५ तसाकमेतयभ्याहितनेः पुरात्रभ्रतश्रीभगवान्मायावैभवंतचवकयय

श्री॰
भा॰ द्वा॰
टी॰
५८

एतन्मार्कण्डेयस्य चरितं तेनानुभूतं च श्रीभगवान्मायावैभवं ते ऽनुवर्णितं ३९ नन्वेवमप्यसत्कालोऽस्य
स्यास्य सप्तकल्पायुष्ट्वं कुतस्त्यमाभ्यन्विरुद्धमेव तत्राह एते मार्कण्डेयेनानुभूतं श्रीभगवन्मायावैभवं तेन
केचित्पूर्वकल्पाविद्वांसः ईश्वरेणकृयानेस्याकस्मिकं नन्वसर्वसाधारणोप्येतत्कथं विस्मृता द्विबहुकाला
श्रावर्तितं ईश्वरस्य तमसहस्रक्ष्यमानेनपुनः पुनः परिवर्तितं यश्च दर्शनेन्द्रियणां संसृतिः सर्गप्रलयादिलक्षणा
आत्मनो भगवतो मायाइत्येव मविद्वांसः विद्वांसस्तु मायाश्रितः स्याऽसौकासाप्यासम्भूतत्वः नतु
दर्शवेवानिर्गमनः सप्तकल्पान्तदर्शनमात्रेणातिवर्द्धितं यत्नो नविरोध इत्यर्थः ४० संशृणुयात् ततः सं

सोऽप्यवाप्तमहायोगमहिमाभार्गवोत्तमः विचरत्यधुनाप्यद्धाहरावेकान्ततां गतः ३८ अ
नुवर्णितमेतत्ते मार्कण्डेयस्य धीमतः अनुभूतं भगवतो मायावैभवमद्भुतं ३९ एत एके विद
विद्वांसो मायासंसृतिमात्मनः अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ४० य एवमेतद्भृ
गुवर्य वर्णितं रथाङ्गपाणेरनुभावभावितं संश्रावयेत्संशृणुयादुतावुभौ तयोर्न कर्माशयसं
सृतिर्भवेत् ४१ इति श्रीभागवते द्वादशस्कन्धे दशमोऽध्यायः १० शौनक उवाच अथे
ममर्थं पृच्छामो भवन्तं बहुवित्तमं समस्ततन्त्रराद्धान्ते भवान्भागवततत्त्ववित् १ तान्त्रिकाः प
रिचर्यायां केवलस्य श्रियः पतेः अङ्गोपाङ्गायुधाकल्पं कल्पयन्ति यथा च यैः २ तन्नो वर्णय भ
द्रं ते क्रियायोगं बुभुत्सतां येन क्रियानैपुणेन मर्त्यो यायादमर्त्यतां ३ ॥ ॥

शृणुयात् ततः संश्रावयेदित्यनयोरुभयोस्तयोः कर्मवासनाकृता संसृतिर्न भवेदिति ४१ इति श्री
भावार्थदीपिकायां द्वादशे दशमः १० एकादशे तु पूजार्थं महापुरुषवर्णनं दिनेऽकृतस्य च वाक्यान्तेष्वतिमासेष्व
थ कथ्यते येनामर्त्यत्वमाप्नोति मर्त्योऽसौ भार्गवोत्तमः तत्र तु क्रियायोगाङ्गोपाङ्गादिकल्पि
ते २ पृच्छामीति हे भार्गव भवन्तं भवान् समस्ततन्त्रसिद्धान्ते तत्त्ववित् पृष्टवान् अहिंसां विधाय इति यदि
वर्णयोऽपासनायाविधिवेदैकवत्तस्यैव तत्स्वतन्त्रस्याङ्गानि पादादीनि उपाङ्गानि गरुडादीनि आयुधानि
सुदर्शनादीनि आकल्पाः कौस्तुभादयः तेषां देहे देवतानयथाकल्पयन्ति यैश्च मन्त्रैः कल्पयन्ति तन्नोव

श्री
हरि
५८

गुरूपदेशागम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वकमाह नमस्कृत्येति विभूतीर्विराड्विग्रहाद्याः ४ श्रेणा
दिवसंपानाभूरादिभिः दर्शयितुं प्रथमं तावद्याकल्पयतीति प्रश्नस्योत्तरमङ्गोपाङ्गस्वरूपं विराड्वि
ग्रहमाह मायाद्यैः प्रकृतिसूत्रमहदहंकारपंचतन्मात्रैर्नवभिस्तत्वैः विकाराः एकादशेन्द्रियाणि पं
चभूतानीति षोडशतत्त्वानि यो विराट्समष्टिदेहो निर्मितो यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं
रूपेण अंगेनोक्ताहिकल्पनालालंभोऽदर्शितम् ५ एतद्वै पौरुषं रूपं प्रपञ्चस्यैव तन्मात्रस्वरूपमेव स्थूलमपि

सूत उवाच नमस्कृत्य गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि याः प्रोक्ता वेदतंत्राभ्यामाचार्यैः पद्म
जादिभिः ४ मायाद्यैर्नवभिस्तत्वैः सविकारमयो विराट् निर्मितो दृश्यते यत्र सचित्के भुव
नत्रये ५ एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दि
शः प्रभो ६ प्रजापतिः प्रजननमपानो मृत्युरीशितुः तद्बाहवो लोकपाला मनश्चन्द्रो भ्रुवौ
यमः ७ लज्जोत्तरोऽधरो लोभो दन्ता ज्योत्स्ना स्मयो भ्रमः रोमाणि भूरुहा भूम्नो मेघाः पुरुष
मूर्धजाः ८ यावानयं वै पुरुषो यावत्या संस्थया मितः तावानसावपि महापुरुषो लोकसं
स्थया ९ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः तत्प्रभा व्यापिनी साक्षाच्छ्रीवत्समुर
सा विभुः १० स्वमायां वनमालाख्यां नानागुणमयीं दधत् वासश्छन्दोमयं पीतं ब्रह्मसूत्रं
त्रिवृत्स्वरं ११ बिभर्ति सांख्यं योगं च देवो मकरकुंडले मौलिं पदं पारमेष्ठ्यं सर्वलोकाभ
यंकरं १२ अव्याकृतमनन्ताख्यमासनं यदधिष्ठितः धर्मज्ञानादिभिर्युक्तं सत्वं पद्ममिहो

ष्ठितत्वात् तदेतदविद्यया रूपमभिधाने अंगकल्पनामाह भूः पादाविति त्रिभिः भूरादय
वादेन श्रीभगवत्पादादिभावना विधीयते ६ प्रजननं मेढ्रं अपानः पायुः ७ ८ अत्रानुक्तमप्यन्यदेव
भूह्यमित्याह यावानयं व्यष्टिपुरुषः स्वमानतः सप्तवितस्तिसंस्थया यावन्मात्रसन्निवेशेन मितः ९ भूषणा
दीन्याह कौस्तुभेत्यादिना स्वात्मज्योतिः शुद्धजीवचैतन्यं यानस्य कौस्तुभस्य प्रभा तामेव श्रीवत्सं
बिभर्ति १० स्वमायां गुणत्रयं बिभर्ति ११ पारमेष्ठ्यं पदं ब्रह्मलोकं १२ अव्याकृतं प्रधानं यत्र अधिष्ठितः

श्री॰
भा॰ टी॰
टी॰
२२

मुख्यतमं प्राणमनन्तं प्राणावैमुख्यइतिश्रुतेः दरवरंश्रेष्ठं १४ इंद्रियाणिशरानाहुराकूतीरस्यस्यंद
ने तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मनोइत्यस्यप्राकृतीः क्रियाशक्तिपुरुषमनः प्रसरथस्या
भिव्यक्तिः बहिरभिव्यक्तेरूपेमुद्रयार्थतयाप्रर्थविमात्मनोवरदाभयहादिरूपत्वंविभर्तितन्मुद्र
यातयातस्याभावयेदित्यर्थः १६ मंडलेदेवयजनेदेवपूजाभूमिस्तर्पमंडलत्वेनभावयादित्यर्थः प्रेत
र्वद्धिमंडलेवादीक्षासंस्कारआत्मनः गुरुरूपनोभवदीक्षामेवआत्मनस्तत्त्वजायोगनेभावयेदित्यर्थ
पारिवयति श्रीभगवनः तोपरिचर्यास्वस्यस्वकलपापत्वयायएवंरूपोभावयेदित्यर्थः १७ पूर्वमा

ओजःसहोबलयुतंमुख्यतत्वंगदांदधत् अपांतत्वंदरवरंतेजस्तत्वंसुदर्शनं १४
नभोनिभंनभस्तत्वंचासिंचर्मतमोमयं कालरूपंधनुःशार्ङ्गंतथाकर्ममयेषुधिं १५
इंद्रियाणिशरानाहुराकूतीरस्यस्यंदने तन्मात्राण्यस्याभिव्यक्तिंमुद्रयार्थक्रिया
त्मतां १६ मंडलंदेवयजनंदीक्षासंस्कारमात्मनः परिचर्याभगवतोआत्मनोदुरितक्ष
यः १७ भगवान्भगशब्दार्थंलीलाकमलमुद्वहन् धर्मंयशश्चभगवांश्चामरव्यजनेऽभजत्
१८ आतपत्रंतुवैकुंठंद्विजाधामाकुतोभयं त्रिवृद्वेदःसुपर्णाख्योयज्ञंवहतिपूरुषं
१९ अनपायिनीभगवतीश्रीःसाक्षादात्मनोहरेः विष्वक्सेनस्तंत्रमूर्तिर्विदितःपार्ष
दाधिपः २० राम

भगवानितिश्रीभगवान्भगशब्दार्थमैश्वर्यादिषाड्गुण्यं १८
सनयसमग्रंनटाकारमंनः स्वयंसमाहृ अकुतोभयंवैकुंठंधामगृहंसमभजन् यद्वावैकुंठस्यविशेषणं
हेद्विजाः पदवबनोतोवायाठः अकुतोभयवैकुंठेबलेथामगृहंसमभजन् ...दिमशल
गुरुतोभयंयद्धामतिष्ठिहन् त्रिवृत्त्रयात्मकः सामरूपोवेदः सुपर्णोसिगरुत्मान्...स्तत्वहेतवः साक्षा
मान यज्ञंयज्ञस्वरूपंपुरुषंयज्ञोवैविष्णुरितिश्रुतेः १९ अनपायिनीश्रीहरेः शक्तिः पंचरात्रागमस्वरूपः येनहरेरात्मा
हात्मनः स्वरूपस्यचिह्नत्वात् तस्माल्लक्ष्म्यादिनार्थः तंत्रमूर्तिः

तस्यैव चतुर्व्यूहोपासनमाह श्रीवासुदेवादिरूपोहि पुरुषः श्रीनारायण एव स्वयं मूर्तिभेदेन व्यूहे
इत्यभिधीयते २१ तस्यैवाध्यात्मिकचतुर्व्यूहोपासनमाह स एव भगवान् विश्वादिभिर्वृत्तिभिः जाग्र
दाद्यवस्थाभिः परिभाव्यते तदुपपादयन्नाह अर्थाबाह्याः इंद्रियैर्ये मनः आशयेन तु भयं संस्कारा
णुक्रमस्तानैस्तानैर्विनियसाक्षीनिः २२ उक्तचतुर्व्यूहस्यैवोपासने विभूतीनामंगाद्युपासनामाह अंगो
पांगादिभिर्युक्तो हरिः भगवान् वासुदेवादिचतुर्मूर्तिर्भिसन् विश्वादिचतुष्टयं बिभर्ति

नंदादयोष्टौ द्वाःस्थाश्च तेणिमाद्या हरेर्गुणा वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं
अनिरुद्ध इति ब्रह्मन्मूर्तिव्यूहोभिधीयते २१ स विश्वस्तैजसः प्राज्ञः तुरीय इति वृत्तिभिः
अर्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते २२ अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयं बिभ
र्ति स्म चतुर्मूर्तिर्भगवान्हरिरीश्वरः २३ द्विजऋषभः स एव ब्रह्मयोनिः स्वयंदृक्स्वम
हिमपरिपूर्णो मायया च स्वयैतत् सृजति हरति पातीत्याख्ययानावृताक्षो विवृत इ
व निरुक्तः तत्परैरात्मलभ्यः २४ ॥

साविश्वादिभावेऽपि तिरोधियंतः तस्यासंगत्वमित्याह विश्वादिचतुष्टयं बिभ्रदपि श्रीभगवानीश्व
र एवेति २३ तस्य ब्रह्मादिविभूतिर्नामाह द्विजऋषभेति स एष एव भगवान् ब्रह्मयोनिर्वेदस्य का
रणमित्यादिहेतुः स्वयं स्वतो भेदाभावेऽपि स्वगतमायया सृजति हरति पातीति हि नाम्ना आख्यया वा
च्यादिरूपया अनावृतज्ञानः अनावृतज्ञानोपि विवृत इव भिन्न इव निरुक्तः प्राणैश्रुतन्नभिन्नः तत्
विहद्व नभ वंधमात्राययति यतस्तत्परैरात्मत्वेनैव लभ्यत इति २४ ॥

श्री० भा० द्वा० टी० ५६

यस्तैरस्यपाल्यत्र मन्त्रेण श्रीकृष्णं प्रार्थयते हे कृष्ण सखे वृष्णिऋषभ अवनिध्रुहो ये राजन्याः तेषां वंशस्य दहन अनपवर्गम् अक्षीणं वीर्यं पौरुषं यस्य गोपवनिताव्रजाः समूहाः भृत्या नारदादयः तैर्गीतं तीर्थरूपं श्रवः कीर्तिर्यस्य श्रवणमेव मङ्गलं यस्य २५ एतज्जपमात्रेणा त्यापि ब्रह्मज्ञानफलमाह य इति कल्ये उषःकाले तच्चित्तः प्रयतः शुचिर्भूत्वा जप्त्वा गुहाशयं हृदि स्थं ब्रह्म पश्यति २६ मङ्गलं देवयजनमित्युक्तं तद्विस्तारमिच्छन् शौनकः सूर्यव्यूहप्रसंगेन रविव्यूहं श्रोतुमि ते पृच्छति एवमयदाह तथा ऋषयो गन्धर्वा अप्सरसो नागा ग्रामण्यो यातुधाना देवाश्च ते

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविन्द गोपव
निताव्रजभृत्यगीततीर्थश्रवः श्रवणमङ्गल पाहि भृत्यान् २५ य इदं कल्य उत्थाय महा
पुरुषलक्षणं तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयं २६ शौनक उवाच शुको यदाह
भगवान्विष्णुराताय शृण्वते सौरो गणो मासि मासि नाना ... वसति सप्तकः तेषां
नामानि कर्माणि संयुक्तानामधीश्वरैः ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः २७
सूत उवाच अनादि अविद्यया विष्णोरात्मनः सर्वदेहिनाम् निर्मितो लोकतन्त्रोऽयं लोकेषु
परिवर्तते २८ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः सर्ववेदक्रियामूलमृषि

कर्मणगणः संक्षेपादिना सौरैः सूर्यसंबंधी सप्तको गणः २७ तेषां सप्तानामधीश्वरत्वम् अनुमि मतन्मासाद्यधिकृत सूर्यो नानाव्यूहे विभागे २८ तत्तत्त्वव्यूहे निरूपयितुं प्रथमं भगवद्रू पस्वरूपमाह अनादीत्यविद्ययात्मं सूर्यो लोकतन्त्रः लोकयात्राप्रवर्तकः २९ नत्वस्य क्रियाभेदो पाधिकमेव नानात्वेन स्वतः इत्याह एक एवेति सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः जगदात्मा आदिकृत्सृष्टिकर्ता हरिरेव सूर्यः सर्वेषां वेदोक्तक्रियाणां मूलम् तेन उपाधिना बहुधो

राम

कालरूपधारिणो हरेः द्वादशादित्यरूपभेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवृत्तये मायया
प्रवृत्तेनेन नवधा भेदमाह काल इति कालः प्रातरादिर्देशः समादिः क्रियाग्निहोत्रादिः कर्त्ता यजमानादिः
करणं स्रुगादिः कार्यं यागादिः आगमः मन्त्रादिः द्रव्यं व्रीह्यादिः फलं स्वर्गादि ३१ नवकालरूप
धारी भगवान् सूर्यः चैत्रादिमासेषु लोकतन्त्रनिर्वाहाय ३२ नामभिर्गणानाह धातेति द्वादशभिः
धाता सूर्यः १ कृतस्थली अप्सराः २ हेतिः राक्षसः वासुकिर्नागः ४ रथकृद्यक्षः ५ पुलस्त्यः ऋषिः

कालो देशः क्रिया कर्त्ता करणं कार्यमागमः द्रव्यं फलमिति ब्रह्मन्नवधोक्तोऽजया हरेः
३१ मध्वादिषु द्वादशसु भगवान्कालरूपधृक् लोकतंत्राय चरति पृथग्द्वादशभिर्गणैः
३२ धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी
३३ अर्यमा पुलहोऽथौजाः प्रहेतिः पुंजिकस्थली नारदः कच्छनीरश्च नयंत्येते स्म माध
वं ३४ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहा रथस्वन इति ह्येते शुक्रमासं नयंत्य
मी ३५ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः शुक्रः चित्रस्वनश्चैव शुचिमासं नयं
त्यमी ३६

६ तुंबुरुः गंधर्वः ७ ३३ अर्यमा सूर्यः पुलहः ऋषिः २ अथौजाः यक्षः ३ प्रहेतिः राक्षसः
४ नारदो गंधर्वः ५ कच्छनीरो नागः ६ पुंजिकस्थली अप्सराः ७ माधवे वैशाखे ३४ मित्रः सू
र्यः १ अत्रिः ऋषिः २ पौरुषेयो राक्षसः ३ रथस्वनो यक्षः ४ तक्षको नागः ५ मेनका अप्स
रा ६ हाहा गंधर्वः ७ ३५ वरुणः सूर्यः १ वसिष्ठः ऋषिः २ रंभा अप्सरा ३ सहजन्यः यक्षः ॥
हूहूः गंधर्वः शुक्रो नागः ६ चित्रस्वनो राक्षसः ७ ३६ ॥

श्री॰ भा॰ द्वा॰ टी॰ ११

इंद्रः सूर्यः १ विश्वावसुर्गंधर्वः २ श्रोतायक्षः ३ एलापत्रोनागः ४ वर्यारादसः ५ अंगि
राऋषिः ६ प्रम्लोचाप्सरा ७ १० विवस्वान् सूर्यः १ उग्रसेनोगंधर्वः २ व्याघ्रोराक्षसः ३ आसा
रणोयक्षः ४ भृगुःऋषिः ५ अनुम्लोचाप्सरा ६ शंखपालोनागः ७ नभस्याख्येभाद्रपदे १८
धनंजयोनागः १ वातोराक्षसः २ सुषेणोगंधर्वः ३ पूषासूर्यः ४ सुरुचिर्यक्षः ४ घृताचीअ
प्सराः ६ गौतमऋषिः ७ नेपाळाख्यमासे मासक्रमात्तिलेचनेकौर्मोक्त्यादिक्रमानुसारेणवै
स्ववेनमासक्रमेणैवाक्तिः क्वचिन्नामव्यत्ययस्तुकल्पभेदेनेतिज्ञेयं ३५ ऋतुः यक्षः १ वर्चाः

इंद्रोविश्वावसुःश्रोतापेलापत्रस्तथांगिराः प्रम्लोचाराक्षसोवर्योनभोमासंनयंत्यमी
१० ५ विवस्वानुग्रसेनश्चव्याघ्रआसारणोभृगुः अनुम्लोचाशंखपालोनभस्याख्यंनयं
त्यमी ३८ ६ पूषाधनंजयोवातःसुषेणःसुरुचिस्तथा घृताचीगौतमश्चेतिनयो
मासंनयंत्यमी ३९ ७ ऋतुर्वर्चाभरद्वाजःपर्जन्यःसेनजित्तथा विश्वऐरावतश्चैवनपा
स्याख्यंनयंत्यमी ४० ८ अथांशुःकश्यपस्तार्क्ष्यऋतसेनःतथोर्वशी विद्युच्छत्रु
महाशंखःसहोमासंनयंत्यमी ४१ ९ भगःस्फूर्जोरिष्टनेमिरूर्णआयुश्चपंचमः का
र्कोटकःपूर्वचित्तिःपौषमासंनयंत्यमी ४२

राक्षसः २ पर्जन्यः सूर्यः ३ सेनजिदप्सराः ४ विश्वागंधर्वः ५ ऐरावतोनागः ६ भर
द्वाजऋषि ७ तपस्याख्येफाल्गुने ४० अंशुसूर्यः ग्रंथांतरेमित्रपाठः १ कश्यपऋषिः २ ता
र्क्ष्ययक्षः ३ ऋतसेनोगंधर्वः ४ उर्वशीअप्सराः विद्युच्छत्रुः राक्षसः ६ महाशंखःनागः ७
सहोमासेमार्गशीर्षे ४१ भगःसूर्यः स्फूर्जोराक्षसः अरिष्टनेमिर्गंधर्वः ३ ऊर्णोयक्षः ४
आयुःऋषिः ५ कार्कोटकोनागः ६ पूर्वचित्तिःअप्सराः पौषोमासः ४२ ॥ ॥

राम॰ ११

त्वष्टा स्तूर्यः १ ऋचीकतनयो जमदग्निस्तथर्षिः २ कंबलाश्वतरो नागः ३ तिलोत्तमाप्सराः
४ ब्रह्मापेतोऽथ राक्षसः ५ ऋतजिन्नयक्षः ६ धृतराष्ट्रोऽथ गंधर्वः ७ इषे भगाश्चाश्विन्याल्काः ४३ वि
ष्णुः स्यादित्यः १ अश्वतरो नागः २ रंभाप्सराः ३ सूर्यवर्चा गंधर्वः ४ सत्यजिद्यक्षः ५ मखापे
तो राक्षसः ६ विश्वामित्रस्तथर्षिः ७ ऊर्जमासे वानिवं ४४ एते वादित्यादयः कीर्तिमेविभज्योक्ताः
प्रातार्थमाचमिवश्च वरौ सूर्य पद्मविवस्वानथ पूषा च पर्जन्यश्चांशुरेव च भगस्त्वष्टा च विष्णुश्च
आदित्या द्वादशास्तु १ पुलस्त्यः पुलहः चात्रिर्वसिष्ठोऽथांगिरा भृगुः गौतमोऽथ भरद्वाजः कश्यपो वा त
रैवत जमदग्निः कौशिकश्च मनयो ब्रह्मवादिनः २ रथकृच्चारिष्टनेमिर्ग्रामणीस्तरथस्वनः रथचित्र

त्वष्टा दधीकतनयः कंबलाश्वः तिलोत्तमा ब्रह्मापेतो घृताजित्तनराष्ट्रश्च इषे भगाः ४३
विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित विश्वामित्रो मखापेत ऊर्जमासे नयन्समा ४४
पत्नाभगारनोविमानादित्यस्य विष्णुतयः स्मरतां संध्यायोद्देशतः कुर्वन्ति हांहो दिने दिने ४५

स्वनः श्रुतश्च सुहृत्याः सेनजित्माधाना तं स्वारिष्टनेमिश्चित्रा तनजिक्कतजित्तथा ३ इति यक्षाः ब्रह्महे
तिः प्रहेतिश्च पौरुषेयो वधस्तथा वर्यो व्याघ्रस्तथा अपश्च वातश्च विद्युद्दिवाकरः ब्रह्मापेतश्च विप्रेन्द्र
यज्ञापेतश्च राक्षसाः ४ वासुकिः कच्छनीरश्च तक्षकः सर्पपुंगवः एलापत्रः शंखपालः तथैरावतसंज्ञि
तः धनंजयो महापद्मः तथा कर्कोटको द्विजः कंबलाश्वतरश्चैव वहन्त्येते यथाक्रमं ५ तुम्बुरुर्ना
रदो हाहा हूहूर्विश्वावसुस्तथा उग्रसेनो वसुरुचिर्विश्वावसुरथापरः चित्रसेनस्तथोर्णायुर्धृत
राष्ट्रो द्विजसत्तमः सूर्यवर्चा द्वादशैते गंधर्वा गायतां वराः ६ कृतस्थल्यप्सरोवर्या तथान्या पुंजि
कस्थली मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमा अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा इति ७ ॥

श्री॰ भा॰ द्वा॰ टी॰ ११

रेतिमासं षट्काख्यकर्म्माणो निरूपयन्ति द्वादशस्वपीति षड्भिः गणैः सो देवः सूर्यः सिद्धिं गेपर्वादि
भिः स्वगमनस्य संबंधेन तान्वरन् शुभां मतिं तनुते गायन्त्यर्थः पुनेन स्तुवंति ४६ तल्लिंगैः सूर्यप्रकाशकै
र्मन्त्रैः ४७ उन्नह्यन्ति रथं बध्नंति ग्रामण्यो यक्षाः नैरृता राक्षसाः ४८ किंच वालखिल्या इति प
पुनेऽग्रतोऽभिमुखं संप्रवृवंति भिर्स्तुवंति ४९ व्यूह्य विभज्य ५० इति श्रीभावार्थे द्वादशस्कंधे एकादशः ११

द्वादशस्वपि मासेषु देवोसौ षड्भिरस्य वै चरन्समंतात्तनुते परत्रेह च सन्मतिं ४६ सा
मर्ग्यजुर्भिस्तल्लिंगैः ऋषयः संस्तुवन्त्यमुं गंधर्वास्तं प्रगायंति नृत्यन्त्यप्सरसोग्रतः
४७ उन्नह्यन्ति रथं नागा ग्रामण्यो रथयोजकाः चोदयन्ति रथं पृष्ठे नैरृता ब
लशालिनः ४८ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोमलाः पुरतोभिमुखं
यांति स्तुवंति स्तुतिभिर्विभुं ४९ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः कल्पे क
ल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः ५० इति श्रीभागवते द्वादशस्कंधे एकादशोध्यायः
११ सूत उवाच नमो धर्म्माय महते नमः कृष्णाय वेधसे ब्राह्मणेभ्यो नमस्कृत्य धर्म्मान्वक्ष्ये
सनातनान् १॥

द्वादशे तु अध्याये सर्वार्थानुक्रम उच्यते प्रथमं स्कंधमारभ्य प्राधान्येन समासतः १ नदेवास्मिन्
श्रीभागवते महापुराणेऽस्मिन् श्रोतव्यो देवपुनो वर्णानि विधानं धर्म्मादीन् प्रणमति तत्र नमः सत्रं इति
द्विमङ्गिरसेत् ... ब्राह्मणेभ्यः ब्रह्मणान् सनातनान् धर्मान् इत्य
पलक्षणोऽनुशोकार्थानां १

राम॰ १

पुरुषस्तेउविंशश्चवरणाययोगवे १ एतत्स्वरूपं वर्णितमर्थेनेति भगवान् षडैश्वर्यादिषड्गुणः साक्षा
संकीर्तितः इति दिवतकाण्डार्थः २ ब्रह्मकाण्डार्थमाह अत्र ब्रह्म विष्णुशिवे गुणाभ्रभवाप्ययेश
भवति अस्मादित्यभवंतस्य योनिः अस्मात्इति ग्रंथ एतेन ब्रह्मैवानेनात्रय शब्दो दर्शितः विज्ञानसं
युतं स्वप्रवृत्तेः ज्ञानेन तुष्या व्याख्यायते शब्दार्थ एते एवंतत् ज्ञानसाधनमित्यर्थः ४ कर्मकाण्डार्थमाह
भक्तियोगस्वसाध्यसाधनरूपः तत्राश्रयं भक्तियोगेनेति वादिनेष एव सामान्यतो निरूपणानीदानीं

एतदुक्तं कथितं विशदविस्तराश्चरितं महत्तं भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं १ ७
अत्र संकीर्तितः साक्षात्सर्वपापहरो हरिः नारायणो हृषीकेशो भगवान्सात्वतांपतिः
२ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं
३ भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयं पारीक्षितमुपाख्यानं नारदाख्यानमे
व च ४ प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः शुकस्य ब्रह्मर्षेः संवादश्च परी
क्षितः ५ योगधारणयोत्क्रान्तिः संवादो नारदाजयोः अवतारानुगीतं च सर्गः प्राधा
निकोग्रतः ६ विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः पुराणसंहिताप्रश्नो महापु
रुषसंस्थितिः ७ ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये ततो ब्रह्माण्डसंभवो

शास्त्रं ये प्रकरणार्थमत्र क्रामति पारीक्षितमित्यादिना तत्र लावाय नारदाख्यानं च ५ ब्रह्मर्षेर्ब्रा
ह्मणात्मजस्य इति शुकस्य विशेषणार्थः ६ उत्क्रान्तिः शरीरादिगतिः प्राधानिकः प्रधानकार्यविषयः
अग्रतः आदितः महदादिक्रमेणेत्यर्थः इति द्वितीयार्थः ७ महापुरुषसंस्थितिः शब्दाद्ये
लीसन् स्थाने प्राकृतिकः प्रकृतिभवो गुणात्मा महद्रूपः वैकृतिकाः महदादयः वैकारिकाः
गायत्र्येव यो समो व सर्गः ८ ॥

श्री॰
भा॰ टी॰
३१

गतिः स्वरूपं ब्रह्मांडजन्मनो ७ अर्थाभ्यां नारायणस्य नरस्य च ८ संतानो धर्मपत्नीनामितिनव
स्य च समस्तस्त्रित्रिंशस्यानन्तरं दक्षस्य च ९ वतं द्विस्कंधमाह नव ब्रह्मणां स्त्रीणां मरीच्यादीनां स
धीनां समस्तात्रिःसंतानः १० पंचमस्कंधार्थमाह ततः प्रियव्रतस्य चरितं ११ द्वीपा
धवर्णनं प्रथमसंक्षेपतः ततो द्वीपादीनां गिरयो नद्यश्च ततः पंचवर्णनं पातालनरकादीनां च

कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः भवउद्धरणं भोगो हिरण्याक्षवधो यथा
९ ऊर्ध्वं निर्गमनं वाक्यं गोमरुदं स्मात्स च ब्रह्म अर्थ नारीश्वरस्याथ यतः स्वायंभुवो मनुः १०
कृतस्तुत्यां स्वायंभुवस्त्रीणां माया प्रकृतिरूपमा संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः
११ अवतारो भगवतः कपिलस्य महात्मनः देवहूत्याश्च संवादः कपिलेन च धीमता
१३ ततश्च ब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशने ध्रुवस्य चरितं यच्च पृथोः प्राचीनबर्हिषः
१४ नारदस्य च संवादः ततः प्रैयव्रतं द्विज नाभेस्ततोऽनुचरितं ऋषभस्य भरतस्य च १५
ततो द्वीपसमुद्राद्रिवर्षनद्यादिवर्णनं ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थिति
१६ दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च संततिः यतो देवासुरनरास्तिर्यङ्मृगखगादयः
१७ त्वाष्ट्रस्य जन्म निधनं पुत्रयोश्च दितेर्द्विजाः दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः
१८ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणं मन्वंतरावतारश्च विष्णोर्हयशिरादयः १९

स्थितिः अत्रैवं तस्कंधे निवर्तनं अजामिलोपाख्याने गृहीतं ततः प्राचीनं २० षष्ठार्थमाह द
क्षजन्मेति सप्तमार्थमाह पुत्रयोश्चेति २१ अष्टमार्थमाह मन्वंतरानुचरितमिति कश्चित्कस्य
विरक्तश्चित्तमोहितो स्याच्च कुलत्वेनेति द्रष्टव्यं २२ रामः ॥

नवमार्थमाह राजवंशेति २१ तत्त्वनस्यवभीषस्य २९ दशमस्कंधार्थमारभ्यतस्यश्रीकृष्ण

वीर्यमास्तंनारसिंहंवामनेवजगत्पते दीरोदमथनंतद्दशनार्थादिवोकसां इले
पाख्यानमथोभंनारोपाख्यानमेवच सूर्यवंशानुकथने शशादाद्यानृगादयः ८ २१
देवास्तरमहाशुद्धेराजवंशानुकीर्तने इक्ष्वाकुजन्मतद्वंशः प्रथमस्यमहात्मनः सो
मवंशादिवर्णनस्यबलस्यचरितेनथा सौवर्णोवाथभगीरथेनेःव.उ.त्स्यस्यवधीमतः ख
ट्वांगस्यवंशोथत्तः सोभरः सगरस्यच २३ रामस्यकोसलेंद्रस्यचरितंकिल्बिषापहे
निमेरंगपरित्यागोजनकानांचसंभवः २४ रामस्यभार्गवेंद्रस्यानिःक्षत्रीकरणोद्भवः
पलस्यसोमवंशस्यययातेर्नहुषस्यच २५ दौःषंतेर्भरतस्यापिशांतनोस्तत्सुतस्यच
ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशानुकीर्तने ९ २६ यत्रावतीर्णोभगवान्कृष्णाख्योजग
दीश्वरः वसुदेवगृहेजन्मततोवृद्धिश्चगोकुले २७ तस्यकर्माण्युदाराणिकीर्तिता
न्यसुरद्विषः पूतनासुपयःपानंशकटोच्चाटनंशिशोः २८ तृणावर्तस्यनिष्पेषःत
थैवबकवत्सयोः धेनुकस्यसहभ्रातुःप्रलंबस्यचसंक्षयः २९ गोपानांचपरित्राणंदा
वाग्नेःपरिसर्पतः दमनंकालियस्याहेर्महाहेर्नंदमोक्षणं ३० व्रतचर्यानुकन्यानायत्र
तुष्टोच्युतोव्रतैः प्रसादोयज्ञपत्नीभ्योविप्राणांचानुतापनं ३१ गोवर्धनोद्धरणंचशक्र
स्यसुरभेरथ यज्ञाभिषेकःकृष्णस्यस्त्रीभिःक्रीडाचरात्रिषु ३२

सोव.मीसीतिनिश ननायाभ्रसमाहितस्यसन्यापपयसूयसः पाने २८ सहभ्रातुः समप्रवस २९
विस्त्राभिषेकंयत्रसृजाग्रामिषेकंस्त्रीनयोर्हदहेको ३२ ॥ ॥

श्री॰
भा॰ द्वा॰
टी॰
३२

द्विषतः प्राद्युम्नसंभवः ३० योदवंशध्वंसादयः तेषां ३८ माहात्म्यं प्रभाव ४१ सर्वपरित्यागः स्वात्मप्र
तस्यानर्थाने ४२ द्वादशाध्यमाह युगेनित्रगलद्गणोनदनत्रूपाहत्रिस्रोतसः त्रिविधाप्राहृताति

व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः रजकक्षिपकचाणूरकंसादीनां च यो वधः ३३
सुतस्यानयने सुनोः पुनः सांदीपनेर्गुरोः ३४ मथुराभ्यां निवसनाय द्वैधवास्याद्यत्रियं
हृतनमृद्धवरामाभ्यां पुनेव हरिणाद्विजाः ३५ रामसूत्रसमानीतसैन्यस्य बकुणोवधः
वानरमयवनेशस्य कृष्णस्य त्यानिवधने ३६ आदानपारिजातस्य स्वधर्मीयाः स्वपालया
न हृक्मिण्याहरणात्प्रद्युम्नस्य हि द्विषतो हरेः ३७ हरस्य जृम्भणं पुत्रेवाणस्य भुजकृन्त
नं प्राग्ज्योतिषपतिं हत्वा कन्यामाहरणं चयत ३८ चैद्यपौण्ड्रकसाल्वानां दंतवक्त्र
स्य दुर्मतेः शंबरो द्विविधः पीठो मुरः पंचजनादयः ३९ माहात्म्यं वधं तेषां वा
राणस्याश्च दाहनं भारावतरणं भूमेर्निमित्तीकृत्य पांडवान् ४० ४१ विप्रशापापदेशे
न संहारः स्वकुलस्य च उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ४१ यत्रात्मविद्याह्य
खिला प्रोक्ता धर्मविनिर्णयः ततो मर्त्यपरित्याग आत्मयोगानुभावतः ४२ युगल
दलानिहमिस्तकलौ नृणामुपप्लवः चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ४३ दे
हत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः शाखाप्रणयनमृषेर्मार्कण्डेयस्य सत्कथा ४४
महापुरुषविन्यासः सूर्यस्य जगदात्मनः ४५ इतिचोक्तं द्विजश्रेष्ठ यत्पृष्टोऽहमिहास्मि ॥
वः लीलावतारकर्माणि कीर्तितानीह सर्वशः ४५ ॥
कानेमित्रिकानित्यावेति ४३ ऋषेवासर्षेः सूर्यस्य च विन्यासेऽर्थः ४४ इतिचोक्तामितिचा
कारादत्यद्विवः पुष्पाभिरिहयत्पृष्टोस्मितमहंस्नामिति विशेषतनानार्थं कथयेनत्राहलीलेति राम॰
सर्वतः नह्युंकीर्तितद्वारेणान्यथेः ४५ ॥ ३२

नत्कीर्तनेनापि किं भिन्नपेद्धा यांनसकलमंगलहर्त्वाभ्यं पतितः कृपादिषु स्खलितः सोपानादिषु
आर्त्तः दुःखितः क्षुत्त्वा क्षुत्वा विवशोऽपि ४७ संकीर्त्यमानः यदा श्रुतोऽनुभावो यस्य सः ते
सां वि प्रविश्य विधुनः शेषं दुःखं विधुनोतीति हीनि सर्वमनुभवं प्रमाणयति यथा गिरिगुहास्थितां
नेतनानिवर्तयतीत्यर्थः दोषाद्धर्मात् अंतरमाह मृषातिवालोऽभ्रमिवेति ४८ हरिसंकीर्तनमेव महोत्
संन्नैरासिरिक्तं सर्वमिथ्याल्पाय मितिप्रपंचयति मृषा गिर इति ब्रज्भिः मृषा गिरः मिथ्यावाचः ग्रस

पतितः स्खलितो वार्त्तः क्षुत्त्वा वा विवशो ब्रुवन् हरये नम इत्युच्चैर्मुच्यते सर्वपातका
त् ४७ संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसां प्रविश्य चित्तं विधु
नोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ४८ मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्य
ते यद्भगवानधोक्षजः तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयं ४९ तदेव
रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवं तदेव शोकार्णवशोषणं नृणां
यदुत्तमश्लोकयशोऽनुगीयते ५० न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हि
चित् तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ५१ ॥ ॥

नीः असत्कथा व्याख्याता यत्र यात उत्तमश्लोकस्य यशो अनुगीयत इति यत् तदेव सत्यं तदेव हि
मंगलं हृदिनि हृषेश्रीभगवद्गुणानामभ्युदयो यस्मात् ४९ नवनवं यथा भवति तथा रुचिरं वि
प्रदं महानुत्सवो यस्मात् ५ चित्राणि पदानि यस्मिन् तद्धि जगत्पवित्रयतीति तथा तद्रूपं य
थोन शृणीतनवर्णयेत् तद्वचः ध्वांक्षतीर्थं काककल्पानां रमणस्थानं न तु हंसैः ज्ञानिभिः से
वितं चित्रपदं रमणीयपादेन चेद्वेतुः यत्रेति ५१

श्री॰ भा॰ द्वा॰ टी॰ ३६

सर्वादिसर्गः सपवाद्यप्रयोगः जननाशसंप्लवः जनसमूहाश्रुनाशकाः यद्यस्मात् नान्येवान्यैः
कीर्त्यमानानिशृण्वंतिश्रोतारिमति गायंतिनीचैस्तथैमेवगृणाति ५२ इदानींज्ञानकर्मादसद
पिश्रीभगवत्कीर्तिनादिश्रेवादरः कर्तव्यइति आह नैष्कर्म्यंननस्यकाशांकंयुक् ज्ञानंयेनानिरंजन
गुणापिनिवर्तकंनरः पिस्त्रवात्तमक्तिवर्जितंयेन नशोभनेनपरोहापर्थनेभवतीत्यर्थः ईश्वरेणा
वेदर्पितेनहियदृत्तमेम सर्वोत्तममपिकर्मतत् दपित्रिनः ऊनः शोभतेयनः शश्वत्साधनकालेफल
कालेपालकालेचश्रमदृङ्खात्मकं ५३ किंचवर्णाश्रमाचारादिषुयः परोमहान् यतिश्रमःस्य

सर्वादिसर्गोजननाशसंप्लवोयस्मिन्त्रिलोकमवद्भवन्नपि नामान्यनेनस्ययशो
किंनानियच्छृण्वंतिगायंतिगृणंतिसाधवः ५२ नैष्कर्म्यमप्यच्युतभाववर्जितं नशो
भतेज्ञानमलंनिरंजनं ऊतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यनुत्तमं ५३
यशःश्रियःमेवपरिश्रमःपरोवर्णाश्रमाचारतपःश्रुतादिषु अविस्मृतिःश्रीधरपाद
पद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ५४ अविस्मृतिःकृष्णपदारविंदयोःक्षिणोत्य
भद्राणिशमंतनोतिच सत्वस्यशुद्धिंपरमात्मभक्तिं ज्ञानंचविज्ञानविरागयुक्तं ५५
यूयंद्विजाग्र्यावतभूरिभागायच्छश्वदात्मन्यखिलात्मभूतं नारायणंदेवमदेवमीशमज

शोभनंयशः श्रियामेवकीर्तिः संपत्तिसूखकेवलं नपरमशुभार्थइत्यर्थः गुणानुवादादिभिस्तुश्रीधर
पादपद्मयोरविस्मृतिर्भवति ५४ ततः किमतआह अविस्मृतिरिति क्षिणोतिनाशयति ५५ अर्थे
दानींश्रोतृन्महात्मनोनंदयन्नाह यूयमिति हेद्विजाग्र्याः शौनकादयः यद्यस्मादात्मन्यंतःकरणे
श्रीनारायणमविशेषपयाद्ध भजनेसंभावनायोल्लोह भूरिभागाः धन्याः कथंभूतं अखिला
त्मभूतं सर्वान्तर्यामिनं तथानपरदेवं सर्वोपास्यं देवंनस्वेस्यापरस्य ऊनईशंयत्न्यायस्माद्यूयंभाभा

राम॰ ३६

मेमयाख्यातं ५३ एतत्कीर्तनादिफलं प्रपंचयितुमाह एतद्व इत्यष्टभिः ५८ यामंक्षणं वेत्यर्थः
त्मानमेव साक्षात्पुनाति न तु स्नानादिवन्नैर्देहमात्रं ६१ ऋगाद्यध्ययनाद्दिनामधुकुल्यादिरूपं
तु द्विरेतेन तत्फलमेतोयविन्त्वोम्सत्रवैंदति किंचैषाक्रमिति ६४ राजन्य उदधिमेखलां पृथ्वींसैथि

अहंच संस्मारित आत्मतत्वं श्रुतं पुरा मे परमर्षिवक्त्रात् प्रायोपवेशे नृपतेः परीक्षितः
सदस्यृषीणां महतां च शृण्वतां ५७ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः मा
हात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ५८ य एतच्छ्रावयेन्नित्यं यामक्षणमनन्यधीः
श्रद्धावान्यो ऽनुशृणुयात्पुनात्यात्मानमेव सः ५९ द्वादश्यामेकादश्यां वा शृण्वन्नायु
ष्मान्भवेत् पठत्यनश्नन्प्रयतः ततो भवत्यपातकी ६० पुष्करे मथुरायां च द्वा
रवत्यां यतात्मवान् उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ६१ देवता मुनयः
सिद्धाः पितरो मनवो नृपाः यच्छन्ति कामान् गृणतः शृण्वतो यस्य कीर्तनात् ६२ ऋचो
यजूंषि सामानि द्विजोऽधीत्यानुविन्दते मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं
पुराणसंहितामेतामधीत्य प्रयतो द्विजाः प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ६४
विप्रोऽधीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलां वैश्यो निधिपतित्वं च शूद्रः शुध्येत पा
तकात् ६५ कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं इह
तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसंगैः ६६

वर्णः ६५ ग्रन्थस्यास्य श्रीमद्भागवतास्यैव प्रभावातिरेके कारणमाह कलिमलानां संहा
तिं समूहं कालयति विनाशयतीति तथा इतरत्र अन्यशास्त्रान्तरे ६६ ॥

श्री॰
भा॰ द्वा॰
टी॰
३४

प्रात्यक्षपतिपादिते श्रीभगवते नमस्करोति नमितिद्वाभ्यां जगदुदयस्थितिसंयमात्मनो शक्तयो यस्य तं आद
यः शक्रेयो यस्य तं द्युपतिभिर्देवैरपि दुःखेन सितः ज्ञातान्तस्तवः स्तोत्रं यस्य तं ६७ उपचिताभि
रुद्भिन्नाभिर्नवाशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्वस्मिन्नात्मन्येवोपरचितं
स्थिरजंगमेवालयो यस्य तस्मै श्रीभगवते ६८ श्रीगुरुं नमस्करोति स्वसुखेनैव निभृतं परिपूर्णं
चेतो यस्य सः तेनैव व्युदस्तः अन्यस्मिन् भावो यस्य तथाभूतोपि अजितस्य रुचिराभिर्लीलाभि

तमहमजमनंतमात्मतत्वं जगदुदयस्थितिसंयमात्मशक्तिं द्युपतिभिरजशक्र
शंकराद्यैर्दुरवसितस्तवमच्युतं नतोस्मि ६७ उपचितनवशक्तिभिः स्वआत्मन्युपरि
विरचितस्थिरजंगमालयाय भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय
६८ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोप्यजितरुचिरलीलाकृष्टसारस्तदीयं
व्यतनुत कृपया यः तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोस्मि ६९
इति श्रीभागवते द्वादशोत्प्रतिसंक्रमलक्षणो महात्म्यवर्णनं नाम द्वादशः ॥१२॥ यं ब्रह्मा
वरुणेंद्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैः वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः
ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय
तस्मै नमः १ पृष्ठे भ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासा
निलाः पांतु वः यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनांभसां यातायातमतंद्रि

[illegible]

[illegible]

राकृष्टः सारः मनस्तदीयं भगवत्संबंधि यस्य सः तत्त्वदीपं परमार्थप्रकाशकं श्रीभगवत्येव व्यासतनयं नतो
स्मीति ६९ इति श्रीभावार्थदीपिकायां द्वादशो द्वादशः ॥१२॥ सर्वपुराणसारत्वाद्वीपयत्येवं स्तनन्नुतिपार्थ
देवं प्रणमति नित्यं वैर्देवैः स्तुवमनेनित्यं स्तुवंति उपनिषदः साकारा नन्तं केदारं येन वा स्थिते नि

राम॰
५४

श्रुतस्त्यां विहाय विषयकामनयान्योपासकाः त्रिमंदा इत्याह विषयेति विषयेषु तृष्णा लोभो येषां तेन तेन प्रकारेः
पश्वादयः उक्ता ये विशुद्धे इंद्रियाद्युपासने तत्परत्वातः किंच आह तेषामिति दीर्घरोदमथनादी तु तैर्यत्र मेव प्रदर्शयितुं इमौ च
तारमनुस्मारयत्रापि च प्रार्थयते दृष्ट्वा भ्राम्यत्र श्रमदोगिरिष्ठा मंदारगिरिः तस्य ग्रावणः ते षाम ग्राणि तेः कंडूयनानि तेन सुखेन निद्रा
लोनिद्राशील स्यथ येषां श्वासानिलानां संस्काराः तेषां कलाश्च लेशाः तदनुवर्तनवशात् जलनिधेः यंभः सायानाया तेन विश्राम्यति नेन्तु
मनुष्ट भाद्देवत तत्संस्कारवशात् नग्राहवेला लोभ वेलानतेऽहमी णेलोभः तस्य निभेन मिषेणोति शर्व स्य टीका २ पुराणसं
ख्याः तासां संभूतिं समाहारं च अस्य तत् श्रीमद्भागवतस्य वाक्ये विषये प्रयोजनं च दानं च पाठादेश्च निबोध ३ त्र्योविंश

सूत उवाच पुराणसंख्यासंभूतिमस्य वाक्यप्रयोजने दानं दानस्य माहात्म्यं पाठादेश्च निबोधत १ ब्राह्मं दशस
हस्राणि पाद्मं पंचोनषष्टि च वैष्णवं त्रयोविंशं च चतुर्विंशति शैवकं ४ दशाष्टौ श्रीभागवतं नारदं पंचविंशतिः
मार्कंडं नव वाह्नं च दशपंच चतुःशतं ५ चतुर्दश भविष्यं स्यात् तथा पंच शतानि च दशाष्टौ ब्रह्मवैवर्तं लिंगमेका
दशैव तु ६ चतुर्विंशति वाराहमेकाशीति सहस्रकं स्कंदं शतं तथा चैकं वामनं दश कीर्तितं ७ कौर्मं स
प्तदशाख्यातं मात्स्यं तत्तु चतुर्दश एकोनविंशत् सौपर्णं ब्रह्मांडं द्वादशैव तु ८ एवं पुराणसंदोहः चतुर्लक्ष उ
दाहृतः तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ९ इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे स्थिताय भवभी
ताय कारुण्यात्संप्रकाशितम् १० आदिमध्यावसानेषु वैराग्याख्यानसंयुतं हरिलीलाकथाव्रातामृता
नंदितसत्सुरम् ॥ ॥

शतिः चतुर्विंशति सहस्राणि शैवकं शिवपुराणं ४ वाह्नं तु अग्निपुराणं दशपंच सहस्राणि चत्वारि शतानि ५ ६ स्कां
दं शतानाधिकाशीति सहस्रं ७ सौपर्णं गरुडपुराणं एकोनविंशत् एकोनविंशतिः ८ महाभारते तु इतिहासः विष्णुधर्मो
त्तरं चेतिहासमपि च श्रीरामायणं च ऋषिप्रोक्तं काव्यं अतः पुराणानां संदोहः समूहः चतुर्लक्षसंख्याक एवं उदाहृतमस्य वाक्यप्रयो
जनादीनि दर्शयितुमाह तत्रेत्यादिना ९ हरिलीलाकथानां व्रातः समूहः स एवामृतं तेन आनंदिताः सतः सुराश्च येन तत्

॥ ॥ ॥

श्री॰ भाग॰ टी॰ ३५ तन्निष्ठंतद्विषयं १२ प्रौष्ठपद्यांभाद्रपद्यांहेमसिंहसमन्वितं स्वर्णसिंहासनारूढंतत्समर्पयामृतेतेनत्समस्य १४ पारमहंस्येपरम
हंसैः प्राप्यसर्वकर्मोपरः भक्त्यातच्छृण्वन्नारिपठतोविमुच्यते १६ श्रीभागवतसंप्रदायप्रवर्तकरूपेणश्रीमद्भगवद्यानलक्षणमेग

सर्ववेदांतसारंयद्ब्रह्मात्मैकत्वलक्षणं वस्त्वद्वितीयंतन्निष्ठंकैवल्यैकप्रयोजनं १२ प्रौष्ठपद्यांपौर्णमास्यांहेमसिं
हसमन्विते ददातियोभागवतंसयातिपरमांगतिं १३ राजंतेतावदन्यानिपुराणानिसतांगणे यावद्भागवतं
नैवश्रूयतेमृतसागरं १४ सर्ववेदांतसारंहिश्रीभागवतमिष्यते तद्रसामृततृप्तस्यनान्यत्रस्याद्रतिःक्वचित्
१५ निम्नगानांयथागंगादेवानामच्युतोयथा वैष्णवानांयथाशंभुःपुराणानामिदंतथा १६ क्षेत्राणांचैवस
र्वेषांयथाकाशीह्यनुत्तमा तथापुराणव्रातानांश्रीमद्भागवतंद्विजाः १७ श्रीमद्भागवतंपुराणममलंय
द्वैष्णवानांप्रियं यस्मिन्पारमहंस्यमेकममलंज्ञानंपरंगीयते यत्रज्ञानविरागभक्तिसहितंनैष्कर्म्यमाविष्कृतं
तच्छृण्वन्विपठन्विचारणपरोभक्त्याविमुच्येन्नरः १८ कस्मैयेनविभासितोयमतुलोज्ञानप्रदीपःपुरातद्रूपे
णचनारदायमुनयेकृष्णायतद्रूपिणा योगींद्रायतदात्मनाथभगवद्रातायकारुण्यतः तच्छुद्धंविमलंविशो
कममृतंसत्यंपरंधीमहि १९ ॥ नमस्तस्मैभगवतेवासुदेवायसाक्षिणे यइदंकृपयाकस्मैव्याच
चक्षेमुमुक्षवे २० योगींद्रायनमस्तस्मैशुकायब्रह्मरूपिणे संसार
सर्पदष्टंयोविष्णुरातममूमुच
त् २१

साक्षिणेतिकस्मैब्रह्मणेप्रज्ञतत्त्वःप्रसमः स्वयंश्रीभगवद्रूपः पुराकल्पादौ तद्रूपेणब्रह्मरूपेणतद्रूपिणा नारदरूपिणायोगीं
द्रायव्यासायतदात्मना श्रीमच्छुकरूपेणतस्यपरंसत्यंश्रीनारायणाख्यंसत्यंधीमहीतिगायत्र्यैवयथोपक्रममुपसंहरन्गाय
त्र्याब्रह्मविद्येयमितिदर्शयति १९ तमेवदेवतारूपेणाचप्र
णमति नमइतिद्वाभ्यांव्याचचक्षेव्याख्यातवान् २० २१

३५

श्री॰ भा॰ टी॰ ३६

भावार्थदीपिकामेतांभगवद्भक्तवत्सलो श्रीपरानंदपादाब्जभृंगःश्रीश्रीधरोकरोत् स्वबालचापल्यालापैःस्वलीलापोषि
तैर्नैः श्रीधरोपमानंदनृहरिःसद्गुरुःस्वयं श्रीपरानंदसंप्रीत्यैश्रुत्वाभागवतंयथाविद्वत्तेनमतेनेदंतन्मतमस्मितिवैभवा

भवेभवेयथाभक्तिःपादयोस्तवजायते तथाकुरुष्वदेवेशनाथस्त्वंमेयतःप्रभोः २२ नामसंकीर्त्तनंयस्य
सर्वपापप्रणाशनं प्रणामोदुःखशमनःस्तंनमामिहरिंपरं॥२३॥ इतिश्रीभागवतेमहापुराणेअ
ष्टादशसाहस्र्यांसंहितायांद्वादशस्कंधेसमाप्तोयंत्रयोदशोध्यायः॥ १३ ॥समाप्तंभागवतनामपुराणम्

1233 MS.

॥ इति श्रीभावार्थदीपिकायां द्वादशस्कंधेत्रयोदशोध्यायः॥१३॥ आदर्शदोषात्मतिविभ्रमाद्वा यदर्थहीनंलिखितंम
याहि तत्सर्वमार्यैःपरिशोधनीयंप्रायेणमुह्यं
तिहियेलिखंति ॥ १२ ॥

३६

12

२६ द्वादशस्कंधपत्राणि

१२